महेशउक्कुरसंस्कृतग्रन्थमाला—वर्षम्-१, पुष्पम्-२

कालिदाससमारोहावसरे निबद्धानां

कालिदासीयोप

रूपकानां समुच्चयः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विश्वविद्यालयस्य ग्रन्थालयादवाप्तो-
ऽपमुद्रणपत्राणां समुच्चयः।
61.92/61.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

महेशठक्कुरसंस्कृतग्रन्थमाला – वर्षम्-१, पुष्पम्-२

कालिदाससमारोहावसरे निबद्धानां

कालिदासीयोप

रूपकानां समुच्चयः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मूल्यम्—पञ्चरूप्यकम्

शकाब्दम् १८८४ ख्रीस्ताब्दम् १९६३

दरभङ्गा-संस्कृत-विश्वविद्यालयेन प्रकाशितम् । हिन्दुस्तान प्रेस-कटरा-प्रयागेन मुद्रितम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

महेशठक्कुरसंस्कृतग्रन्थमाला—वर्षम्-१, पुष्पम्-२

सम्पादकः

महामहोपाध्यायडाक्टरश्रीउमेशमिश्रः

उपकुलपतिः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सम्पादकीयम्

सुविदितमेतत्तत्रभवतां विद्वद्वराणां यन्महाराजाधिराज-मिथिलेशडाक्टरसर-कामेश्वर-सिंहशर्म्मणां वदान्यतया विहारराज्यशिक्षाविभागसहकृतस्य मुख्यमन्त्रिणः डाक्टर-श्रीकृष्णसिंहस्योद्योगेन मिथिलामण्डलान्तर्गते दरभङ्गानगरे १९६१जनवरीमासस्य षड्विंशतमे दिवसे कामेश्वरसिंहसंस्कृतविश्वविद्यालयः स्थापितो बभूव । विश्व-विद्यालयस्यास्याध्यक्षतायां कालिदासस्मृतिसमारोहार्थं विहारराज्येन कियदनुदानं प्रदत्तम् । समारोहकार्येषु विद्वद्भिः निबद्धानां कालिदासीयकाव्यकथापात्रचरितादिक-मादायाभिनवरचितोपरूपकानां प्रकाशनमपि एकमायोजनं विद्यते । एवं कृते नवीनानां काव्यरसिकानां मनसि काव्यरचनायां प्रोत्साहः प्रवृत्तिश्च संस्कृतभाषायाः विशेष-प्रचारोऽपि स्यादेवेति कृत्वा एतानि उपरूपकानि प्रकाश्य विपश्चितां पुरतः स्थापितानि । प्रसङ्गात् प्राप्तमेकमन्यदप्युपरूपकं संस्कृताज्ञानां प्रोत्साहनार्थमेव सहैव प्रकाश्यते । शुभमिति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उपरूपक-सूची

उपरूपकानां नामानि	रचयितारः	पृष्ठसङ्ख्याः
१. पुनस्सङ्गमः	पं० श्रीआनन्दझा, न्यायाचार्यः, संस्कृतविभागः, विश्वविद्यालयः, लखनऊ	१
२. वीरवदान्यम्	डॉ० श्रीचण्डिकाप्रसादशुक्ल, M. A., D. Phil. संस्कृतविभाग, विश्वविद्यालय, प्रयाग	१५
३. मदनदहनम्	पं० श्रीरमेशखेर, बम्बई	२९
४. कालिदासः	पं० श्रीवनेश्वरपाठक, राँची	३९
५. मदनदहनम्	पं० श्रीरा० शं० महाराज	४७
६. गुरुदक्षिणा	पं० श्रीयदुवंशमिश्र, व्याकरणाचार्य, अध्यापकः, उच्चाङ्गलविद्यालय, खाजेडीह, पो० जयनगर, दरभंगा	५७
७. इन्दुमती-परिणयः	पं० श्रीनारायणमिश्रः, गवेषकः, मिथिलासंस्कृतविद्यापीठः, दरभंगा	६५
८. कालिदास-गौरवम्	पं० श्रीजीवनाथझाशर्मा, महाविद्यालयः, जनकपुर, जयनगर, दरभङ्गा	७९
९. शाकुन्तलम्	पं० श्रीरामावतारमिश्र, अनुग्रहकन्योच्चविद्यालयाध्यापकः	८७
१०. कालिदास-पाणिकरणम्	पं० श्रीसभानाथपाठकः 'नाथ', श्रीबालगोविन्दसं० विद्यालय, आरा (बिहार)	९७
११. सीतात्यागः	पं० श्रीअच्युत-तात्याराव बोबड़े माजलगांवकर, संस्कृतमहाविद्यालय, नान्देड (होली), दक्षिण भारत	१०५

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुनस्सङ्गमः

श्रीमद् आनन्दमा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुनस्सङ्गमः

(नेपथ्ये)

प्रेम्णो महान् प्रभावो यः खलु जन्मान्तरेऽपि योजयितुम् ।
प्रभवति वियोगवन्तं वियोगवत्या प्रियं प्रियया ॥१॥

(देवी मेना गम्भीरभावेन किमपि विचिन्तयन्ती समुपविष्टाऽस्ति । ततः प्रविशति हिमवान्)

हिमवान्—प्रिये ! किमेवमुद्विग्नेव निर्निमेषभावेन किमपि विचिन्तयन्ती भवती समागतेऽपि तावकीने मयि न मां सम्भावयति प्रसन्नेनावलोकनेनापि ?

का ते चिन्ता सुमुखि ! हृदये यद्वशान्निश्चलाङ्गी
हस्तन्यस्ताऽऽननाब्जाऽनुगतमपि न मां वीक्षसे स्नेहपात्रम् ।
नाभावं किञ्च कञ्चित्तव वरभवने देवि ! पश्यामि सूक्ष्मं
स्वीयं किंवाऽपराधं कमपि ननु ततो ब्रूहि यन्मानसेऽस्ति ॥२॥

मेना— (जवेनोत्तिष्ठन्ती) महाराज ! क्षम्यतां ममापराधोऽयमसावधानताकृतः । सत्यं भवादृशे हि पुरुषधौरेये महति सहकारपादपे संगताया भाग्यवत्या लताया इव नास्त्यभावः कस्यापि स्वोपभोगयोग्यस्य वस्तुनो मम । किन्तु—

हिमवान्—प्राणेश्वरि ! किमिदं किन्त्विति ?

किं तदस्ति यदर्थं त्वं चिन्तामुकुलिताननना ।
यस्य सम्पादनेनाशु प्रसन्नं स्यान्मनो मम ॥३॥

मेना— जीवनधन ! नान्यत्किमपि तत् । एतदेव यत्—

गौरी गौरी तडिदिव परित्यज्य चाञ्चल्यभावाऽऽ-
क्रान्तं बाल्यं वयसि सुभगे यौवने न्यस्तपादा ।
अङ्गान्यस्याः स्फुटकमलिनीसुन्दराण्यद्य किन्तु
प्रेम्णः स्थानं वरमथ वरं सङ्गता नैव हन्त ! ॥४॥

हिमवान्—(दीर्घमुष्णञ्च निःश्वस्य) प्रिये ! स्थाने खलु सन्तापस्तत्रभवत्याः । परन्तु किमत्र विधीयताम् ? नायं विषयः स्वाधीनः । नानर्थिने कन्या दातुं शक्यते । यतः प्रोक्तं धर्मशास्त्रिभिः—

यदृच्छयाऽखिलं वस्तु यस्मै कस्मै प्रदीयताम् ।
अन्नं विद्या तथा कन्या नानर्थिभ्यः प्रदीयते ॥५॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अर्थिनेऽपि च न यस्मै कस्मैचन देयतामर्हति प्राणादप्यधिकस्नेहभाजनतामादधती चान्द्रीज्योत्स्नेवामितसौन्दर्यमयी दुहिता पार्वती ।

मेना— महाराज ! सत्यमुच्यते भवता । परन्त्वत एव महच्चिन्तास्थानमेतत् ।

हिमवान्—प्रिये ! अलमधिकया चिन्तया । न ह्येवंविधमतुलं सौन्दर्यं महता ननु प्रयासेन निष्पाद्य व्यथीकर्तुमर्हति तत् तद्विधाता विधाता । न कोऽपि कथमप्यनुन्मत्तः स्वेनैवारोपितां सुसंसिक्तामभितमकरन्दबिन्दुनिष्यन्दिपुष्पशतमनोहारिणीमुच्छिनत्ति ननु मालतीलताम् ।

मेना— सत्यं भवतु भवद्वचनम् । सर्वथा सफलां कुर्वन्तु मनोरथलतामावयोरर्चनाप्रसन्ना देवाः ।

(ततः प्रविशति ससम्भ्रमा चेटी)

चेटी— (अञ्जलिं बद्ध्वा) करुणानिधान ! कोऽपि मृगाजिनं वसानः पिशङ्ग्या ननु मौञ्ज्या विराजमानः स्फाटिकीमक्षमालां परिदधानो वादयन्वीणां नादेन श्रोतृमनोमोहयन्ती-मनुरूपेण शिष्येणैकेन समनुगतो भास्वानिव भास्वरः कश्चिदृषिसत्तमो द्वारि भवद्दर्शन-मपेक्षमाणस्तिष्ठतीति श्रुत्वा देवः प्रमाणम् ।

हिमवान्—अहो महानयं भाग्योदयः । किं देवर्षिर्नारदः समुपागतोस्तीदानीमवरेऽस्मिन् साधीयसि ? तद्देवि ! सिद्धं नः समभिप्रेतम् । त्वरया पाद्यार्घाचमनीयादिकं प्रेष्यतां देवर्षिसपर्यायै । यावदहं तद्दर्शनाय गच्छामि ।

पटपरिवर्तनम्

द्वितीयं दृश्यम्

(ततः प्रविशति वर्णितस्वरूपः सशिष्यो देवर्षिर्नारदः)

नारदः— अहो रमणीयता नगराज-राजधान्याः ! वत्स सामव्रत ! पश्य—

सम्पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थो हि समीरणोऽयम् ।
उद्गास्यतामिच्छति किन्नराणां
तानप्रदायित्वमिवोपगन्तुम् ॥६॥

सामव्रतः—सर्वथा सत्यमाचार्यवर्य ! नूनं साफल्यं जातमद्य सर्वेषामिन्द्रियाणां ज्ञानसाधनानाम् । दृश्यतां गुरुदेव !

वने स्थितानां ननु तापसानां
दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति खल्वौषधयो रजन्या-
मतैलपूराः पठनप्रदीपाः ॥७॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—इतो दृश्यतां वत्स !

पदं तुषारश्रुतिधौतरक्तं
यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तै-
र्मुक्ताफलैः केसरिणां किराताः ॥८॥

सामन्रतः—गुरुदेव ! सत्यं महत्त्वमस्य नगराजस्य । यतो हि

दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैश्शिरसां सतीव ॥९॥

नारदः—को नाम सन्देहो वत्सास्य नगराजतायाम् ? पश्य

लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
अस्यार्थयुक्तं गिरिराजशब्दं
कुर्वन्ति बालव्यजनैश्चमर्यः ॥१०॥

सामन्रतः—अहो मनोमोहकताऽस्य स्थानस्य

कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम् ।
अत्र स्रुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति ॥११॥

नारदः—दृश्यतां वत्स ! दृश्यताम् कीदृशी तुङ्गशृङ्गताऽस्य नगाधिराजस्य !

आमेखलं सञ्चरतां घनानां
छायामधःसानुगतां विलोक्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते
सानूनि यस्यातपवन्ति सिद्धाः ॥१२॥

सामन्रतः—गुरुदेव ! रमणीयमिदं स्थानमध्ययनाध्यापनयोरपि कृते । विलोक्यताम्—

न्यस्ताक्षरा धातुरसेन नूनं
भूर्यत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरबालकाना-
मधीतलेखक्रिययोपयोगम् ॥१३॥

(ततः प्रविशति पूजोपकरणयुक्तेन भृत्येनानुगतो हिमवान्)

हिमवान्—(अञ्जलिं बद्ध्वा)

देवर्षिसत्तम ! भवत्सुसमागमेन
धन्यीकृतोऽस्मि नितरां त्वदधीनकृत्यः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भाग्योदयेन हि भवादृशपादपद्म-
किञ्जल्कपूतमभवद्गृहमेतदद्य ॥१४॥

नारदः—(हस्ते गृहीत्वा) आगम्यतां नगराज ! आगम्यताम् । अत्रोपविश्यताम् । ननु कथमेव-मुच्यते भवता ? यतो हि—

प्रभामहत्या शिखयेव दीप-
स्त्रिमार्गयेव त्रिदिवस्य मार्गः ।
संस्कारवत्येव गिरा मनीषी
गौर्याऽसि पूतश्च विभूषितश्च ॥१५॥

हिमवान्—देवर्षे ! सत्यमुच्यते । परन्तु कन्यारत्नमवश्यदेयमिति कृत्वा महच्चिन्ताकरं भवति । सर्वं हि दानं पात्रमपेक्षते, किं पुनः कन्यारत्नदानम् ! अतो नितरामस्ति चिन्ता पात्रवरला-भाय । तद्भवानत्र शरणं समुपयुक्तवरलाभसाहाय्यकर्मणि ।

नारदः— (स्वगतम्) अतर्कितोपनतेव समवलोक्यते कार्यसिद्धिः । नूनं भगवानाशुतोषोऽपि वर्त्ततेऽ-त्रैव तपोनिरतः । परन्तु तत्र कामवासनाजागरणमपेक्षितम् । यतो हि न तद्विना गौरी-शिवसङ्गमः । न च तं विना तारकजितः स्कन्दस्योत्पत्तिः । परन्तु गोपनीयमेतदिदानीम् । (प्रकाशम्) नगराज ! इयतो लघुनः कार्यस्य कृत एव एतावती महती भवतः चिन्ता ? अन्यस्य का कथा ? भवदिच्छा चेत् साक्षाच्चतुर्भुजं भगवन्तं विष्णुमपि कन्याया अस्याः वरत्वेन योजयितुं शक्नोमि ।

हिमवान्—(ऋषिपादयोर्विनतो भवन्) यद्येवं तर्हि महती स्याद्दासस्यास्योपरि भगवतो भवत-स्तावदनुकम्पा । यतो ह्यन्योऽपि वरो विष्णुत्वेनाभिमतः सन्नेव कन्याया लक्ष्मीत्वेना-भिमतायाः पाणिग्राही विधीयते । तद्यदि साक्षाद् भगवान् विष्णुरेव तथाकृतो भवितुं शक्नुयात्, किमितः परमन्यत्स्यान्मोदस्थानम् ? किन्तु देवर्षे ! किं सम्भावनार्हमिदं सङ्घटनम् ?

नारदः— आः किमेवमुच्यते नगाधिराज ! ममापि नाम सदा जाग्रच्चरणशिखस्य सर्वान् लोकानेकी-कुर्वतो नारदस्य कृते सम्भावनासम्भावनप्रश्नः ? तदनुजानातु मामस्मै कार्यायैव शीघ्रम् (इति सशिष्य उत्तिष्ठति) 7

(हिमवान् किञ्चिदनुगम्य चरणस्पर्शपूर्वकं परावर्त्तते,
अन्तःपुरञ्च प्रविशति)
पटक्षेपो भवति

—:०:—

तृतीयं दृश्यम्

(ततः प्रविशति पुनः पुनरुच्चैर्हसन्ती जया)

जया— प्रियं नः प्रियं नः । श्रुता मया प्रच्छन्नभावेन श्रीमन्नगराजदेवर्षिनारदयोर्मध्ये प्रचलन्ती

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मम प्राणाधिकप्रियाया राजकुमार्याः सख्याः पार्वत्याः परिणयकथा। प्राप्ता प्रचुरा परिहाससामग्री। तत् प्रथमं सर्वं प्रियसख्यै विजयायै संश्राव्य तया सह त्वरितं गत्वा राजकुमारी सकाशं तावदावां परिहसिष्यावो यावन्न प्रभविष्यति राजकुमारी समुद्रिक्तकोपा। (पुनरुच्चैर्हसन्ती अग्रे विलोक्य) अये! कथमियं मे प्रियसखी विजया अत्रैव समागच्छन्ती समवलोक्यते? आगच्छ प्रियसखि! आगच्छ त्वरितम्। प्रियतरं ते निवेदयामि। (पुनरुच्चैर्हसति)

विजया— (प्रविश्य सस्मितम्) अयि चञ्चले! किमद्य लब्धं त्वया यदेवं प्रसन्नतमानना पुनरुच्चैर्हसन्ती विलोक्यसे?

जया— न लब्धम्, किन्तु लब्धः! (उच्चैर्हसति)

विजया— (सस्मितम्) वरो वा अवरो वा?

जया—वर एव नावरः।

विजया—अयि मुग्धे! किमेवं ब्रवीषि? किं वरः सन्नपि नावरः कश्चिद्भवति?

जया—कथमहं जानीयाम्? मन्ये त्वं सर्वं साधुतया जानासि। (हसति)

विजया—कथं न जानीयाम्? किमहं नास्म्यस्मिन् विस्तृते समाजे यत्र सुनिर्मले दर्पण इव सर्वाः शक्यन्तेऽवलोकयितुं परिस्थितयः। अस्तु। ब्रूहि चपले! कीदृशोऽसौ वरस्ते?

जया—न मम, तत्रभवत्याः।

विजया—दुर्विनीते! किमेवमसम्बद्धं प्रलपसि? स्पष्टं ब्रूहि।

जया—सत्यमेव ब्रवीमि तत्रभवत्याः प्रियसख्या राजकुमार्याः। चल शीघ्रं तन्निकटे तत्रैव सर्वं स्पष्टीकरिष्यामि येन न स्यात्पुनरुक्तिगौरवमपि। (पुनरुच्चैर्हसति)

विजया—(अग्रे विलोक्य) अये स्वयमेवेयं समुपागच्छति नन्वावयोरन्वेषणं विदधती प्रियसखी। तदेहि तत्रैव निविडतरस्य रक्ताशोकतरोश्छायायामुपविश्य मधुरमधुरया कथया सुखिन्यो भवामः। (अग्रे गत्वा) अये! कथमियं नासाग्रमात्रकृतदृष्टिर्विचिन्तयन्ती किमपि सुगभीरम्मन्ये स्वीयामेकाकितामपि न जानाति।

जया— (उच्चैर्विहस्य) प्रियसखि! सर्वथा भग्ना तवैकाकितेदानीम्। त्यज नासाग्रगामितां दृष्टेः। अचिरेणैव प्राप्स्यसि वरं बहुकरम्। (पुनर्हसति)

पार्वती— (सावधाना सस्मितम्) अहो प्राप्ते भवत्यौ? नैकट्यमासयाऽपि मया नावलक्षिते भवत्यौ निकटमायाते।

जया— (वारम्वारमुच्चैर्हसति)

पार्वती—ननु सखि जये! किमेवमुन्मादिनीव विहसस्यत्यन्तम्?

जया— पूरयावयोर्मुखं झटिति मोदकेन प्रचुरेण। प्रियं ते श्रावयामि (हसन्ती) बहुकरो वरस्त्वया लब्धः।

विजया—(सस्मितम्) सखि किमियं कथयति जया?

पार्वती— (ईषद्धसन्ती) आश्लेषरसिकेयमित्यत्र नेदानीं सन्देहः। परन्तु द्वितीयासमासाश्रयणे स्वयमपीयं स्याद्बहुकराक्रान्तेति नावगणयति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विजया—(जयां प्रति सस्मितम्) वदेदानीं किं वदिष्यसि ?

जया— (हसन्ती) श्रूयतां सुस्पष्टमिदानीं कथ्यमानाम्। नगराजनारदाभ्यां भगवांश्चतुर्भुजो वरः प्रियसख्याः निर्णीतः।

विजया— (सस्मितम्) यद्येवं तर्हि सत्यंभाग्यवती प्रियसखी। यतो हि वरोऽसौ न केवलं चतुर्भुजः अपि तु चतुरभुजोपीति श्रूयते। (पार्वतीवक्त्रसि दृष्टिं क्षिपन्ती) कदाप्यसौ कमल-कोरकस्पर्शं न त्यजति।

जया— मन्ये त्वयानुभूता तस्य चतुरकरता। (उच्चैर्हसति)

विजया—अयि चञ्चले! श्रुतं न त्वया? श्रूयते इत्युक्तं मया।

पार्वती— (सक्रोधं) किमेवं युवां प्रलपतः? कथमहं जन्मान्तरस्मृत्या जानन्ती स्वीयं जीवनधनं मनस्यप्यन्यं कञ्चिदानेतुं शक्नोम्यथ कथञ्चित्?

दक्षाल्लब्धसमुद्भवाऽथ पितरं त्यक्त्वा पतिद्रोहिणम्
जाताऽहं खलु शैलराजसदने गौरीति दाक्षायणी।
ईशानः प्रभुरव्ययो मम पतिस्तस्मादिहैवाचले
तत्कालात्तपसि स्थितोऽस्ति ननु यो यस्मान्न चान्यः परः ॥१६॥

विजया— (आश्चर्यं नाटयन्ती) किमेवम्? तर्हि पितुर्नगाधिराजस्यादेशमवाप्य प्रतिदिन-मस्माभिर्गन्तव्यं तत्र तदर्चोपकरणसाधनाय।

जय— अवश्यमेवं विधेयम्। जाते कदाचित्समाधिभङ्गे ध्रुवं तेनाप्युलब्धा स्यात्प्राक्तनस्मृतिः प्रियसख्या, अस्तु भूयान् समयो व्यतीतः तदिदानीं गन्तव्यमितः।

(इति निष्क्रामन्ति सर्वाः)

—:०:—

चतुर्थं दृश्यम्

(भगवान् शिवः सर्वतः पुष्पिते वने देवदारुद्रुमवेदिकायां बद्धसमाधिरस्ति। एकतो नातिनिकटे सुसंस्कृताङ्गी धृतालङ्कारा गौरी शिवं निर्निमेषभावेनावलोकयन्ती वर्त्तते। परतश्च रतिवसन्तसहितः कामदेवो नातिदूरे शरसन्धानं नाटयन्नास्ते।)

जवनिका अपसरति

कामदेवः—(प्रणमन्) भगवन्निन्दुशेखर!

सखा वसन्तोऽयमुपागतो महत्-
साहाय्यकारी बलमाप्य तेन।
त्वामन्तकस्यान्तकमप्यमोघ-
बाणेन शीघ्रं वशमानयामि ॥१७॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(इति बाणमुत्सृजति)

(शिवः किञ्चिदुन्मीलिताभ्यां लोचनाभ्यां सस्पृहं पार्वतीमुखं पश्यति। ततो हृदि जातं किञ्चिद्विकारं समनुभूय सावधानतया तत्कारणं विमृशन् कृतशरसन्धानं कामदेवमवलोक्य)

शिवः— (सक्रोधं) आः किमेवम् ? (इति विस्फारिततृतीयललाटलोचननिर्गताग्निना कामं दहति। आस्फोटितदिगन्तो भवति महत्तमः शब्दः। हाहाकारः प्रवर्त्तते। "क्रोधम् प्रभो ! संहर संहर" इत्याकाशवाणी प्रसरति। वसन्तः पलायते। कामपत्नी रतिर्भूमौ निपत्य मोहमुपगच्छति। वसन्तपत्न्यौ चित्राफल्गुन्यौ तामाश्वासयतः शिवोऽन्तर्धानं गच्छति। विषण्णवदना पार्वती गृहं गच्छति)

फल्गुनी—हा हन्त !! किमिदमकस्मात् सञ्जातम् ? ननु सखि ! समाश्वसिहि समाश्वसिहि।

चित्रा—नन्विदानीं कः खलूपायो विधीयताम् ? (मस्तकनयनोर्जलं सिञ्चति। फल्गुनी निजाञ्चलेन वीजयति)

रतिः— (किञ्चित्संज्ञां प्राप्य सक्रन्दनं विलपति) हा प्राणधन !

कृतवानसि विप्रियं न मे
प्रतिकूलं च न ते मया कृतम्।
किमकारणमेव दर्शनं
विलपन्त्यै रतये न दीयते ॥१८॥

हा हन्त !! किं करोमि ? कुत्र यामि ? किमालपामि ? किं विलपामि ? न किमपि मनसि मे स्फुरति।

हा लीलाधिदेव !

हृदये वससीति मत्प्रियं
यदवोचस्तदवैमि कैतवम्।
उपचारपदं न चेदिदं
त्वमनङ्गः कथमक्षता रतिः ॥१९॥

हा निरुपमधनुर्धर !

हरितारुणचारुबन्धनः
कलपुंस्कोकिलशब्दसूचितः।
वद सम्प्रति कस्य बाणतां
नवचूतप्रसवो गमिष्यति ॥२०॥

प्राणेश्वर ! पश्यैकवारमपि

अलिपङ्क्तिरनेकशस्त्वया
गुणकृत्ये धनुषो नियोजिता।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विरुतैः करुणस्वनैरियं
गुरुशोकामनुरोदितीव माम् ॥२१॥

हा अनुपमसुन्दर !

प्रतिपद्य मनोहरं वपुः
पुनरप्यादिश तावदुत्थितः ।
रतिदूतिपदेषु कोकिलां
मधुरालापनिसर्गपण्डिताम् ॥२२॥

निर्दय ! अनाथाऽहं क्व यामीदानीम् ? किं विचिन्तयसि, सखा वसन्तस्ते रक्षको भविष्यतीति । हा हन्त !

क्व नु ते हृदयङ्गमः सखा
कुसुमायोजितकार्मुको मधुः ।
न किमुग्ररुषा पिनाकिना
गमितः सोऽपि सुहृद्गतां गतिम् ॥२३॥

(इति श्रुत्वा चित्राफल्गुन्यावपि पतिवियोगं जानन्त्यौ मूर्च्छां नाटयतः । संज्ञां लब्धा सर्वाः क्रन्दन्त्यो भूमौ विलुठन्ति)

जवनिका पतति ।

—: ० :—

पञ्चमं दृश्यम्

(घोरे विजने वने एकाकिनी तपोऽनुरूपवेषा पार्वती ध्यानं नाटयन्ती बद्धपद्मासना तिष्ठति । इतस्ततो घोराणां वनजन्तूनां महान्निनादो भवति)

जयाविजययोः प्रवेशः

विजया— (जयां प्रति)

हिमहतजलजीयां कान्तिमेषा दधाना
चरति महदमोघं तत्तपः पश्य गौरी ।
वियतमभिमुखः स्याद्येन देवाधिदेवः
शशिविलसितचूडो भूतिमानाशुतोषः ॥२४॥

जया— (गौरीं प्रति) अयि कठोरव्रते ! कथमेवं नियमाग्निना नवमालिकाकुसुमकोमलं वपुर्दहसि ?

इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं यदिच्छसि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ध्रुवं हि नीलोत्पलपत्रधारया
शमीलतां छेत्तुमहो व्यवस्यसि ॥२५॥

पार्वती—(ध्यानभङ्गं नाटयन्ती सखेदम्) आः कथमेवमुपदिशसि विपरीतम् ? किमुपायोऽपि भजति दुर्भगानां विघ्नत्वम् ? प्रोच्यताम् । जीवनधनं तमप्राप्य किं प्रयोजनमेतेनान्यदृष्टावेव मनोहरतां दधता वपुषा हतभाग्येन ? (अश्रूणि विमुञ्चन्ती मूर्च्छति । जयाविजये विषादं नाटयन्त्यौ मृडालोशीरचन्दननलिनीपत्रादिभिरुपचारं कुरुतः । पार्वती पूर्वस्थितिं लभते ।)

ततः प्रविशति ब्रह्मचारिवेषः शिवः

सर्वाः— (समुत्थाय) स्वागतमतिथये ! (समभ्युत्थानं ददाति)

विजया—(आसनं दत्वा) इदमासनलङ्कृयतामतिथिना तपोधनेन ।

पार्वती—(जयां प्रति) हला प्रियसखि ! समानीयतामतिथेरस्य महतस्सपर्यायै पाद्यार्घाचमनीयादिकं त्वरितम् ।

ब्रह्मचारी—अलमलमायासेन । भवतीनां दर्शनेनैव सर्वथा मन्येऽहं कृतार्थमात्मानम् । ननु का नाम भवत्यः ? किमर्थं चात्र वृकवराहगजशार्दूलसिंहगण्डकादिभिरसंख्यैर्हिंस्रैर्जन्तुभिस्समाकीर्णतया महाघोरे मानवगतागतशून्ये कान्तारे निवसन्ति विहीना बन्धुबान्धवैः ? महन्मे कौतूहलं सञ्जायते मनसि । तदशेषविज्ञापनकृपयाऽनुगृह्यतामयं जनो भवतीनामवलोकनेनैव प्राप्तप्राप्तव्यमात्मानं मन्यमानः ।

जया— (पाद्यादिकमुपस्थाप्य) अतिथिवर्य ! 'सर्वथा समुदाचारविरुद्धमिदं यत्खल्वतिथिसपर्यापूर्वमेव प्रश्नोत्तरप्रवाहचालनम् । तत्पादप्रक्षालनादिकं प्रथमं विधीयताम् । तदनन्तरमालापमाला तु प्रचलिष्यत्येव ।

ब्रह्मचारी—एवमेव भवतु । कथमस्मदनादरणीयतामर्हेदनुरोधो भवतीनाम् (इति पादप्रच्छालनादिकं करोति)

(पार्वती स्वयमेव भिक्षाभाजनमादाय कियतश्चन फलिनो वृक्षस्याधस्ताद् गच्छति । स्वतः प्रपतितैः फलैः पूर्णं भवति भिक्षाभाजनम्)

ब्रह्मचारी—(आश्चर्यं नाटयन्) अहो तपसः प्रभावोऽत्र भवत्याः यत्खल्वेते वनस्पतयोऽपि नाशामतिवर्तन्ते । किमतः परं भवेच्चित्रम् ?

(पार्वती पूर्णं भिक्षाभाजनं तस्य पुरतः स्थापयति)

ब्रह्मचारी—इदानीं तिष्ठतु तावदिदमेवमेव सर्वम् । भवतीनां परिचयं प्रति महत्कुतूहलाक्रान्तं मनो मे नेतः परं सोढुमर्हति कालातिपातकष्टम् ।

विजया—अतिथे ! नास्ति कथाविस्तारः ! यद्येवं ! कुतूहलि भवन्मनः, तर्हि श्रूयताम् । इयमस्मत्प्रियसखी पार्वती सुगृहीतनामधेयस्य नगाधिराजहिमालयस्यास्ति दुहिता । अस्याः सखीयमेका जया । अपरां मां विजयेति नाम्ना व्याहरन्ति जनाः ।

ब्रह्मचारी—ततः परम् ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विजया—सेयमावयोः प्रियसखी पुत्री नगराजस्य "अव्यवहितातीतं पतिं पशुपतिमेव पुनः पतिमाप्तुया"मिति चरति तपो महदतिकष्टकरम् ।

ब्रह्मचारी—(पार्वतीं प्रति) अयि तपस्विनि ! सत्यमिदम् ? यद्भणति सखीयं भवत्याः ?

पार्वती—(लज्जानम्रमुखी) आम् । एवमेव ।

ब्रह्मचारी—(उच्चैर्हसन्) कोऽयं ते दुरध्यवसायः ? ननु नगराजसम्भवे !

त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुवर्षि च ॥ २६ ॥

मम त्विदानीमेवं जायते सुदृढा मतिर्यत्-
द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया कपालिनः
कला च सा कान्तिमती कलावतः
त्वमस्य लोकस्य च नेत्रकौमुदी ॥ २७ ॥

पार्वती—आः !! कथमेवमुच्यते भवता ?

ब्रह्मचारी—सुगभीरं स्वयमेव विचार्यतां भवत्या

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि ! मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ? ॥२८॥

अतः सुविनीता मे प्रार्थनेयं निकटे भवत्याः यत्
निवर्तयास्मादसमीप्सितात्मनः
क्व तद्विधः त्वं क्व च पुण्यलक्षणा ।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया ॥३९॥

पार्वती—(क्रोधेनारक्तलोचना कम्पमानाधरा च भूत्वा) मैवं पुनर्वक्तव्यम् । यतो हि

अकिञ्चनः सन् प्रभवः ससम्पदां
त्रिलोकनाथः पितृसद्मगोचरः ।
समीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ॥४०॥

अतस्सर्वथा सत्यमिदं यत्
विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कपालि वास्यादथवेन्दुशेखरं
न विश्वमूर्त्तेरवधार्यते वपुः ॥४१॥

ब्रह्मचारी—(पुनर्वक्तुमुपक्रमते) श्रूयतां तपस्विनि !

पार्वती—(सक्रोधदुःखम् सख्यौ प्रति)

निवार्यतामालि ! किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥४२॥

अथ वा, आस्ताम् । अहमेवेतो व्रजामि ।

(इति सोद्वेगा ततो गन्तुमुपक्रमते)

ब्रह्मचारी—(आत्मानं प्रति) हिमप्यतः परं धैर्यं धर्त्तुमस्मि समर्थः (इति स्वीयेन वास्तविकेन शैवेन रूपेण प्रकटीभूय वक्षसा पार्वतीं परिगृह्णन् प्रकाशम्)

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति निश्चिनु नान्यथात्र ।
वर्णिस्वरूपमभिगृह्य कृता परीक्षा
साफल्यमाप भवती ननु तत्र पूर्णम् ॥४३॥

(पुष्पवर्षणपूर्वकमशरीरिणी दैवीवाक् श्रूयते)

उत्पत्तिस्तारकजितः स्कन्दस्य सुविनिश्चिता ।
अस्माकं महती भीतिर्नष्टा हर्षः समागतः ॥४४॥

(जवनिका पतति)

समाप्तमुपरूपकम् ।

"पुनस्संङ्गमः"

इति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वीर-वदान्यम्

श्रीचण्डिकाप्रसादशुक्लः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शैशवेऽभ्यस्तविद्यस्य यौवने विषयैषिणः ।
वार्द्धके मुनिवृत्तेश्च योगेनान्ते तनुत्यजः ॥७॥
रघोर्हि चरितं वक्तुं कस्य वाग्विभवः क्षमः ।
तथापि तद्गुणैर्भूयश्चापलाय प्रणोदितः ॥८॥
भवतु. अहं तु शिरसा प्रथमगृहीतां परिषदः आज्ञां कर्तुमिच्छामि । अतः
तत्सन्तो द्रष्टुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥

(नेपथ्ये सङ्गीत-ध्वनिः)

(हेमन्तवर्णनम्)

नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः समुपागतोऽयम् ॥१॥
प्रभूतशालिप्रसवैश्चितानि मृगाङ्गनायूथविभूषितानि ।
मनोहरक्रौञ्चनिनादितानि सीमान्तराण्युत्सुकयन्ति चेतः ॥२॥
प्रफुल्लनीलोत्पलशोभितानि सोन्मादकादम्बविभूषितानि ।
प्रसन्नतोयानि सुशीतलानि सरांसि चेतांसि हरन्ति पुंसाम् ॥३॥
बहुगुणरमणीयो योषितां चित्तहारी परिणतबहुशालिव्याकुलग्रामसीमा ।
विनिपततितुषारः क्रौञ्चनादोपगीतः प्रदिशतु हिमयुक्तस्त्वेष कालः सुखं वः ॥४॥

पारिपार्श्विकः—(आकर्ण्य) अये भाव ! कुतोऽयं सङ्गीतध्वनिः श्रूयते ?

(शृण्वन्) आम्, ज्ञातम् । एष सपत्नीकः कोसलेश्वरो दिलीपः वसिष्ठाश्रमं प्राप्नोति ।

सूत्रधारः - मार्गे जनपदकन्यकास्तं हेमन्तवर्णनेन प्रत्यभिनन्दयन्ति । तद् आवामपि स्वकार्यम् अनुतिष्ठावः ।

इति निष्क्रान्तौ
इति प्रस्तावना

प्रथमोऽङ्कः

नेपथ्ये शङ्खध्वनिः स्वाहाध्वनिश्च

स्थानम्– वसिष्ठाश्रमः

ततः प्रविशति एकत्र आसने स्वयमुपविशन् अन्यत्र राजानम् उपवेशयँश्च

वसिष्ठः—राजन् ! सप्ताङ्गेऽपि काकुत्स्थराज्ये कच्चित् सर्वं कुशलम्, कच्चिद् उत्तरकोसलेषु प्रजा निरातङ्का निरीतयो वर्धन्ते ? (निर्वर्ण्य) किमिति विषण्ण इव कोसलेश्वरः ?

दिलीपः—भगवता ब्रह्मयोनिना गुरुणा त्वया च एवं चिन्त्यमानस्य मे सानुबन्धाः सम्पदः कथं न

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

निरापदः स्युः। (सोच्छ्वासम्) किन्तु प्रभो! तव वध्वां सुदक्षिणायाम् अद्यावधि अदृष्ट-सदृशप्रजं मां सद्वीपा रत्नसूरपि इयं पृथुला धरित्री नाल्पमपि सुखयितुं प्रभवति। यतः—

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे॥

विधातः! तया हीनं मां स्नेहात् स्वयं सिक्तं वन्ध्यम् आश्रमवृक्षकम् इव पश्यन् कथं न दूयसे! भगवन् मत्तः परं पिण्डविच्छेददर्शिनां स्ववंश्यानामेतद् ऋणं मे असह्यपीडम् अवेहि। (साञ्जलिः)

तस्मान् मुच्ये यथा तात संविधातुं तथार्हसि।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः॥१०॥

वसिष्ठः—भवतु, राजन्! प्रणिधानेन तावद् एवं पुण्यशीलस्यापि ते किं सन्ततेः स्तम्भकारणम् इति पश्यामि (क्षणं चक्षुषी उन्मील्य ध्यात्वा) आम्, ज्ञातम्। राजन्! पुरा एकदा शक्रलोकाद् उर्वीं प्रति त्वरया आगच्छता त्वया पथि कल्पतरुच्छायामाश्रिता सुरभिः प्रदक्षिणादि-क्रियया साधु नाभ्यर्हिता। अतः स्तोकं रुष्टेव

अवजानासि मां यस्मादतस्ते न भविष्यति।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा॥११॥

दिलीपः—हन्त! अनवधानतया महद् दुष्कृतम् अनुष्ठितं मया। किन्तु गुरो! किमिति स शापो मया न श्रुतः?

वसिष्ठः—तत्र आकाशगङ्गाया उद्दामदिग्गजे स्रोतसि नदति स शापो न त्वया न च ते सारथिना-पि श्रुतः।

दिलीपः—(सवैक्लवम्) प्रभो! तत्कथं स शापः प्रतिक्रियेत?

वसिष्ठः— राजन्! मा अधैर्यं गमः। यद्यपि इदानीं सा सुरभिस्तु भुजङ्गपिहितद्वारं पातालम् अधि-तिष्ठति किन्तु तदीया सुता नन्दिनी नाम इह मदाश्रम एव विद्यते। तां सपत्नीकः समाराधय। प्रीता हि सा कामदुघा एव। (नेपथ्याभिमुखम् अवलोक्य) पश्य पश्य नाम्नि कीर्तिते एव इयं कल्याणी उपस्थिता। राजन्! आत्मनः सिद्धिम् अदूरवर्तिनीं विगणय।

दिलीपः—(विलोक्य सहर्षम्) अनुग्रह एव ते एष सर्वसमर्थस्य। तत् प्रभो! को नु खलु विधिर्भ-विष्यति अस्याः परिचर्यायाः?

वसिष्ठः—राजन्! वन्यवृत्तिः सन् शश्वद् आत्मानुगमनेन इमां गां भक्त्या प्रसादयस्व।

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः॥१२॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इत्था प्रसादादस्यास्त्वं परिचर्यापरो भव ।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ॥१०॥

दीलिपः—यथाऽऽज्ञापयति भगवान् ।

इति निष्क्रान्तौ
पटाक्षेपः

(द्वितीयाङ्कस्येतिवृत्तम्)

[नन्दिनीं भक्त्या सेवमानस्य दिलीपस्य दिनानाम् एकविंशतिर्व्यतीयाय । अथान्येद्युर्गां चारयन् यावद् राजा क्षणम् अद्रिशोभाप्रहितेक्षणो भवति तावत् कुतोऽपि गुहातः नन्दिन्या आक्रन्द इव श्रूयते । राजा सम्भ्रान्तमनास्ततोऽभिद्रवति । तत्र सिंहाक्रान्तां च नन्दिनीं पश्यति । स झटिति सिंहं हन्तुं तूणीराद् बाणमाक्रष्टुं हस्तं तूणीरं नयति किन्तु तस्य हस्तस्तत्रैव श्लिष्यति । सिंहः साट्टहासं मनुष्यवाचा स्वपरिचयं ददाति । स कुम्भोदरनामा निकुम्भस्य पार्वतीसिंहस्य मित्रम् अस्ति । इह तस्य देवदारुद्रुमविशेषस्य रक्षायै स्वयं भगवत्यैव अङ्कागतसत्त्ववृत्तिरूपेण नियुक्तस्तिष्ठति । अधुना स इमां गां कथमपि न मोक्ष्यत इति । अन्ततो राजा स्वशरीरप्रदानेन तां गां ततो मोचयितुं प्रयतते । सिंहः प्रस्तावं स्वीकरोति । राजा स्वदेहम् आमिषपिण्डम् इव सिंहाय समर्पयति । सिंहोऽदृश्यो भवति । नन्दिनी अनया परीक्षया सुतरां प्रीता राज्ञे पुत्रं वरं ददाति ।]

द्वितीयोऽङ्कः

स्थानम्—हिमवत उपत्यका

नेपथ्याद् गोः आर्तनादः

दिलीपः—(गोचारकवेषेण धनुष्पाणिः व्यग्रं प्रविश्य)—कुतो भगवत्या नन्दिन्याः शब्द इव श्रुतः । सा तु हिंस्रैः पशुभिः मनसाऽपि दुष्प्रधर्षेति अद्रिशोभाप्रहितेक्षणेन मया वत किञ्चिद् अनवधानमिव अनुष्ठितम् । (सिंहं विलोक्य) अये !! सिंहाक्रान्ता नन्दिनी !!! तिष्ठ रे क्रूर निर्दय ! (इति तूणीराद् बाणमाक्रष्टुं दक्षिणं हस्तं स्कन्धं नयति किन्तु हस्तस्तत्रैव श्लिष्यति)

सिंहः—(साट्टहासं मनुष्यवाचा कथयति)

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहःशिलोच्चये मूर्च्छति मारुतस्य ॥१॥

(पुनरपि अट्टहासः)

दिलीपः—भोः कोऽसि त्वम् ? किं भगवत्याः पर्वतराजपुत्र्याः निकुम्भनामा मृगेन्द्रः उताहो सिंहवपुः प्रतिपन्नः मधुरिपोः कश्चिदवतारविशेषः, अथवा सूर्यदेवताको राशिविशेषः? न खलु कदाप्यहम् इषुप्रयोगे एवं वितथप्रयत्नोऽभवम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सिंहः —(कर्कशया वाचा सावलेपम्)

कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ॥२॥

दिलीपः —आम्, अष्टमूर्तेः कृपाभाजनं निकुम्भमित्रं भवान् । अथ किमर्थमिहागतस्त्वम् ?

सिंहः— अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हैमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥३॥

दिलीपः— पश्याम्येनम् । दिष्ट्याऽतिप्रियोऽसौ भगवत्याः । तत् किमस्य ?

सिंहः— कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥३॥
अतः तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति ॥४॥

दिलीपः—ज्ञातम्, तद्रक्षको भवान् अस्य देवदारोः । अथ अनया धेन्वा किमपराद्धं भवतः ?

सिंहः—अधुना खलु

तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥५॥

सिंहः—स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥६॥

दिलीपः—भो मृगेन्द्र ! यत् किमपि विवक्षुरस्मि तत् संरुद्धचेष्टस्य मे कामं हास्यम् किन्तु भवान् प्राणभृताम् अन्तर्गतं सर्वं भावं वेद । अतोऽभिधास्ये एव ।

सिंहः—स्वैरं निगद्यताम्, किं विवक्षुरसि ।

दिलीपः—मृगेन्द्र ! स्थावरजङ्गमानां प्राणिनां सर्गस्थितिप्रत्यवहारहेतुः स भगवान् अष्टमूर्तिर्ममापि मान्य एव । किन्तु आहिताग्नेः गुरोः अपि इदं गोरूपं धनं पुरस्तात् नश्यत् अनुपेक्षणीयम् एव ।

सिंहः—कोऽत्र सन्देहः । उभयमपि तथैव । तत् किं तेन ?

दिलीपः—अतो हे मृगेन्द्र ! त्वं मदीयेन देहेन शरीरवृत्तिं निर्वर्तयितुं प्रसीद । महर्षेः इयं धेनुः विसृज्यताम् । दिनावसाने अस्या बालो वत्स उत्सुको मातरं प्रतीक्षिष्यते ।

सिंहः—(विहस्य)

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् ॥७॥

दिलीपः—भोः कुम्भोदर ! क्षत्रशब्दोऽयं क्षतात् त्रायते इत्यर्थे भुवनेषु प्रसिद्धः । तद्विपरीतम् आचरतो मम राज्येन किम् ? उपक्रोशमलीमसैः प्राणैर्वा किम् ?

सिंहः—राजन् !

भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥८॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अथैकधेनोरपराधचण्डाद् गुरोः कृशानुप्रतिमाद्बिभेषि ।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोघ्नीः ॥९॥

दिलीपः—मैवं मृगेन्द्र ! अन्यपयस्विनीनां विश्राणनादपि महर्षेः अनुनयः कथं नु शक्यो भविष्यति । नेयं प्राकृता धेनुः । सुरभेस्तुल्यामेवैनां जानीहि । त्वयापि कुम्भोदर! रुद्रसामर्थ्यादेव अस्यां प्रहृतम् । अतः सम्प्रति स्वदेहार्पणनिष्क्रयेण मया भवत्तः मोचयितुं न्याय्या । एवं च तव पारणा न विहता स्यात् मुनेः क्रियार्थश्च न लुप्तो भवेत् । यतः

भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥१०॥

सिंहः—(विहस्य) मैवं राजन् !

संरक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥११॥

दिलीपः (सानुनयम्) हे भूतनाथानुग ! सख्यसम्बन्धम् आभाषणपूर्वम् आहुर्मनीषिणः । स च वनान्ते संगतयोः आवयोः वृत्त एव । अत इदानीं सम्बन्धिनो मे इमं प्रणयं विहन्तुं नार्हसि त्वम् ।

सिंहः—कामं ब्रूहि, किमिच्छसि ?

दिलीपः—सखे ! यदि कुतोऽपि हेतोरहं भवताऽहिंस्यः मतः, तदनुग्रहोऽयं भवतः । किन्तु मदीयाद्भौतिकशरीरादस्माद् यशःशरीरे मे दयालुर्भव । तन्मे रक्ष । यतः एषु एकान्त-विध्वंसिषु भौतिकेषु पिण्डेषु खलु मद्विधानाम् अनास्थैव ।

सिंहः—बाढम् ।

(सद्यः राज्ञो हस्तः तूणीराद् विमुच्यते । स च शस्त्रं विहाय विनतमात्मानं सिंहस्य समर्पयति । आकाशे दुन्दुभिनादः पुष्पवृष्टिश्च । सिंहो विलुप्यते । तत्स्थाने प्रसन्न-वदना नन्दिनी दृश्यते)

नन्दिनी—उत्तिष्ठ वत्स ! मया मायाम् उद्भाव्य परीक्षितोऽसि । ऋषिप्रभावात् मयि अन्तकोऽपि प्रहर्तुं न प्रभुः । अन्ये हिंस्राः किमुत !

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ॥१२॥

दिलीपः—भगवति ! अनुगृहीतो दिलीपः । अथ यदि सुप्रीता भगवती तदम्ब ! वंशस्य कर्तारं सुद-क्षिणायां तनयमेकम् अभिलषामि ।

नन्दिनी—लप्स्यसे वत्स ! अनन्तकीर्तिं कुलरत्नं पुत्रम् ।

पटक्षेपः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तृतीयाङ्कस्येतिवृत्तम्

[नन्दिन्याः प्रसादेन दिलीपस्य रघुनामाऽनुपमः पुत्रोऽजायत। विधिवद् विद्यां परिसमाप्य कुमारो रघुर्यौवराज्यभाग् भवति। अथ शततमेऽश्वमेधे आह्रियमाणे कुमारो रघुर्गुरुणा दिलीपेन मेध्याश्वरक्षायै नियुज्यते। इन्द्रः अश्वम् अपहरति। अश्वं मार्गमाणो रघुरकस्मात् तत्रागतां नन्दिनीं पश्यति। अथ तद्दुग्धनिःस्यन्दजलेन नेत्रे प्रमृज्य कुमारो दिव्यदृष्टिः सम्पद्यते। ततः स पूर्वस्यां दिशि अश्वम् अपहरन्तम् इन्द्रं देवराजं दृष्ट्वा तम् आकारयति। वाग्विवादानन्तरं तयोर्युद्धं भवति। वज्रप्रहारमपि अगणयन्तं रघुपराक्रमं दृष्ट्वा तुष्टो वृत्रहा अश्वम् अमुक्त्वाऽपि रघुपितरं दिलीपं शताश्वमेधफलभाजं करोति, स्वेनैव चरेण च सर्वमेतद् वृत्तं यज्ञस्थिताय दिलीपाय प्रेषयति]

तृतीयोऽङ्कः

रघुः— (सैनिकैरनुगम्यमानः ससम्भ्रमं परितोऽवलोकयन् प्रविश्य)—क्व नु खलु, क्व नु खलु अलक्षितोऽभूत् तुरङ्गः? किं मां तातो वक्ष्यति? नासौ दृश्यते क्वापि? (नेपथ्याभिमुखमवलोक्य सहर्षम्) हन्त! इयं श्रुतप्रभावा वसिष्ठधेनुर्भगवती नन्दिनी नाम यदृच्छया इहागता दृश्यते। तदस्याः पुण्येन अङ्गनिःस्यन्दजलेन लोचने प्रमृज्य तावत् पश्यामि क्वास्ते मेध्यस्तुरङ्गम इति। (निष्क्रान्तः पुनः प्रविश्य पूर्वाभिमुखं पश्यन्) अहो! अतीन्द्रियेषु अपि भावेषु उपपन्नदर्शनो जातोऽस्मि। अये! असौ पूर्वस्यां दिशि कश्चिद् दिव्यः पुरुषः क्रातवम् अश्वं नयन् दृश्यते। (निपुणं निरूप्य) हन्त, असौ हि हरिदश्वः सहस्राक्षः स्वयं शतक्रतुर्देवराजः। (उच्चैराकारयन्) भो भो देवराज! तिष्ठ, तिष्ठ, मदीयपितुर्मखीयोऽयमश्वः न नेतव्यो न नेतव्यः।

अपि च— मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे।
अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे ॥१३॥

इन्द्रः— (नेपथ्यादेव) भो राजन्यकुमार! तथ्यमात्थ त्वम्। यशोधनैः स्वं यशः शत्रुभ्यः सर्वदा रक्षणीयमेव किन्तु भवद्गुरुर्जगत्प्रकाशं मे तद् अशेषं यश इज्यया लङ्घयितुमुद्यत इति।

रघुः— देवेन्द्र! त्रिलोकनाथेन दिव्यचक्षुषा त्वया ननु सदा मखद्विषो नियम्या इति स एव त्वं धर्मचारिणां कर्मसु स्वयम् अन्तरायो भवसि चेत् हन्त! लोके विधिश्च्युत एव भविष्यति।

इन्द्रः— (नेपथ्यादेव) किन्तु कुमार! शतक्रतुस्तु जगति केवलं शक्र एव, यथा पुरुषोत्तमः केवलं हरिरेव, यथा च त्र्यम्बकः केवलं महेश्वर एव।

रघुः— किन्तु देवेन्द्र! केसलेन्द्रे सर्वथा तं क्रतुम् आहर्तुं समे एवं तस्करवत् तदयमङ्गम् अश्वम् अपहर्तुं न युज्यते भवता, यजुः श्रुतेः पथः दर्शयितार ईश्वरा मलीमसां पद्धतिं नाददते। अतः मुच्यतां तुरङ्गः।

इन्द्रः— (नेपथ्यादेव) भोः क्षत्रियडिम्भ! न तस्करवत् अपि तु कपिलवत् मया तव पितु-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रयं यज्ञीयः अश्व अपह्रियते । तदत्र तव प्रयत्नेन अलम् । सगरस्य सन्ततेः पदव्यां पदं मा निधाः ।

रघुः— (सहासमाकारयन्निव) भोः परयशोऽमर्षिन् सहस्राक्ष ! यदि एष ते सर्गं एव तत् शस्त्रं गृहाण । न खलु रघुमनिर्जित्य भवान् कथमपि कृती भवेत् ।

(इति ससैनिको रघुर्धनुषि बाणं सन्धाय नेपथ्याभिमुखमभिद्रवति)

प्रथमः सैनिकः—(प्रविश्य ससम्भ्रमम्) अहो ! पश्यत, शरासनं सशरं कुर्वाणः आलीढशोभिना वपुःप्रकर्षेण कुमारः साक्षात् पिनाकिनमेव विडम्बयन् कथं तिष्ठति ?

द्वितीयः सैनिकः—(प्रविश्य) हन्त ! एष कुमारेण अवष्टम्भमयेन पत्रिणा हृदि क्षतः गोत्रभिद् अमृष्यमाणः स्वधनुषि तीक्ष्णं शरः सन्धत्ते ।

तृतीयः सैनिकः—(ससम्भ्रमम् प्रविश्य)—अहो बत ! विद्धः कुमारः भीमासुरशोणितोक्षितेन सायकेन गोत्रभिदा बृहद्वक्षसि ।

चतुर्थः सैनिकः— हन्त भोः ! कुमारविक्रमः कुमारोऽपि शचीपत्रविशेषकाङ्किते सुरेन्द्रभुजे स्वनामचिह्नं बाणं निखनति ।

प्रथमः सैनिकः—अहो ! आश्चर्यम् !! आश्चर्यम् !!! कुमारेण एकेनैव बाणेन प्रसह्य सुरलक्ष्म्याः केशकर्तनमिव देवराजस्य महाशनिध्वज एव हृतः । हन्त ! भृशं कोपितो दिवस्पतिः कुमारेण ।

द्वितीयः सैनिकः—अहो ! अर्धचन्द्रमुखेन बाणेन विडौजसः शरासनज्यैव कुमारेण लूना । आः ! प्रकुपितो वज्री स्फुरत्प्रभामण्डलं वज्रमेवादत्ते । हा ! हता वयम् । (इति नेपथ्ये वज्रनिर्घोषः)

सर्वे सैनिकाः— (विलोक्य सहर्षम्) हन्त ! उज्जीवितः पुनरुत्थितः कुमारः । उज्जीविता वयम् विजयतां विजयतां कुमारः ।

प्रथमः सैनिकः—अहो ! प्रसन्नेन शतक्रतुना सस्नेहम् आलिङ्ग्यते कुमारः । तावेतावित एवाभिवर्तेते

सर्वे सैनिकाः— विजयेतां देवेन्द्रकुमारौ ।

(ततः प्रविशतः इन्द्रकुमारौ)

इन्द्रः— कोसलकुमार ! मदीयं वज्रं सारवत्तया पर्वतेष्वपि विषयम् अद्यावधि त्वदन्येन केनापि मानुषेण न विसोढम् । तद् वत्स ! सुतरां प्रीतोऽस्मि ते शौर्यसारेण । तुरङ्गमातिरिक्तम् उच्यतां किमिच्छसीति ।

रघुः— देवेन्द्र ! यदि अश्वम् अमोच्यमेव मन्यसे ततः समग्रेण विधिनैव कर्मणि परिसमाप्ते अजस्रदीक्षाप्रयतः स मद्गुरुः अस्य क्रतोः अशेषेण फलेन युज्यताम् इति ।

इन्द्रः— एवमस्तु ।

रघुः— अन्यच्च लोकेश ! यज्ञस्थितः यजमानत्वेन अष्टमूर्तेरंशतया अन्यैर्दुरासदः स कोसलेश्वरः यथा इमं सर्वं वृत्तान्तं तवैव सन्देशहरात् शृणोति तथा विधीयताम् इति ।

इन्द्रः— एवमेव भविष्यति यथेच्छति कुमारः ।

(पटक्षेपः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चतुर्थाङ्कस्येतिवृत्तम्

अधुना रघुरयोध्यां शास्ति । अथ दिग्विजयं कृत्वा रघुर्विश्वजितं नाम यज्ञम् आहरति यत्र किल स्वविभूतिं मृत्पात्रशेषां करोति । तदैव रघुं महर्षेर्वरतन्तोः शिष्यः कौत्सः प्राप्नोति । राज्ञः अर्घ्यमृत्पात्रं दृष्ट्वा कौत्सः स्वार्थोपपत्तिं प्रति नितरां निराशो भवति । रघुणा आगमनप्रयोजनं पृष्टः स गुरवे दीनाराणां चतुर्दश कोट्यः प्रदेया इति निवेदयति । रघुस्तं द्वित्राण्यहानि अग्निगृहे स्थित्वा सोढुं प्रार्थयति । ततः समस्तां वसुमतीं गृहीतसाराम् अवेक्ष्य इयान् स्वर्णराशिः कुतो लभ्येत इति कुबेरात् धनं निष्कृष्टुं चकमे । श्वः कुबेरोऽभियातव्य इति निश्चयं करोति । किन्तु तत्रैव रात्रौ भीतेन कुबेरेण राजकोषगृहस्य मध्ये दीनाराणां अतिमहती वृष्टिः कृता । रघुः चतुर्दशकोटितः एकमपि अधिकं दीनारं ग्रहीतुमस्वीकुर्वत्यपि कौत्से उष्ट्रवामीशतैर्वाहयित्वा तं समस्तं हेमराशिं वरतन्तोर्महर्षेराश्रमं प्रापयति । अतीवप्रीतः कौत्सः राज्ञे पुत्रप्राप्तिमाशंसते ।

चतुर्थोऽङ्कः

(स्थानम्—अयोध्याराजसभा)

रघुः - भो भोः प्रेष्ठा राजन्यवर्याः ! भवतां समागमेन सुष्ठु निष्पन्नोऽयं मे विश्वजिद् यज्ञः । तदर्थमनुगृहीतोऽस्मि । नेच्छामि साम्प्रतं चिरविरहोत्सुकावरोधान् भवतः क्षणमप्यधिकम् उपरोद्धुम् । तत्प्रतिष्ठन्तां भवन्तः स्वां स्वां राजधानीम् ।

(इति राजानः एकैकशः रघुं प्रणम्य ततः पुरस्कारं गृहीत्वा निष्क्राम्यन्ति)

दौवारिकः—(प्रविश्य) विजयतां देवः । देव । महर्षेर्वरतन्तोराश्रमात् तच्छिष्यः कौत्सः प्राप्तः द्वारि तिष्ठति श्रुत्वा देवः प्रमाणम् ।

रघुः—कौत्सः वरतन्तुशिष्यः प्राप्तः ?

दौवारिकः—देव ! अथ किम् ?

रघुः—तेन अग्निगृहमार्गमादेशय ।

दौवारिकः—इत इतो देवः ।

(इति निष्क्रान्तौ)

रघुः—(प्रविश्य) सुव्रत ! गच्छ सादरं समानय महर्षिशिष्यम् ।

दौवारिकः—यथाज्ञापयति देवः ।

(निष्क्रान्तः)

(पुनः प्रविश्य)

दौवारिकः—इत इतो महर्षिशिष्यः । एष महाराजः कोसलेश्वरः स्वयं सार्घपात्रहस्तः भवन्तं सादरं प्रतीक्षमाणस्तिष्ठति । तदुपसर्पतु एनं भवान् ।

कौत्सः—(उपसर्प्य) विजयतां साकेतपतिः ।

रघुः—भगवन् ! काकुत्स्थो रघुः शिरसा प्रणमति । अनुगृह्णातु भगवान् अर्घ्यमिदम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कौत्सः—(अर्घ्यं गृहीत्वा सुनिपुणं निरूप्य सखेदम्) राजन्! अलम् उपचारेण ।

(इति उपविशतः)

रघुः—भोः कुशाग्रबुद्धे! कच्चिन् मन्त्रकृताम् ऋषीणाम् अग्रणीः अशेषज्ञानप्रदाता ते गुरुः कुशली? कच्चिन् महर्षेः वासवधैर्यलोपि कायिकं वाचिकं मानसं च त्रिविधमपि तपः अन्तरायैर्न व्ययमापाद्यते?

कौत्सः—राजन्! सर्वत्र अस्माकम् वार्तम् एव अवेहि। त्वयि नाथे प्रजानां कुतः अशुभम्? सूर्ये तपति लोकस्य दृष्टेः आवरणाय तमिस्रा कथं कल्पेत? कुशली गुरुः निरन्तरायं च तपस्यति तपः ।

रघुः—भगवन्! सुतनिर्विशेषं संवर्धितान् वः आश्रमपादपान् कच्चिद् वाताद्युपप्लवस्तु न बाधते?

कौत्सः—निरुपप्लवा एव अस्माकम् आश्रमवृक्षा वर्धन्ते राजन्!

रघुः—भो विद्वन्! कच्चिद् आश्रममृगीणां प्रसूतिस्तु अनघा एव?

कौत्सः—अथ किम्? अनघा एव आश्रममृगा मोदन्ते ।

रघुः—अथ तीर्थजलानि वः सर्वथा शिवानि तु सन्ति?

कौत्सः—अथ किम्? राजन्! सर्वथा श्रेयस्कराणि एव आश्रमतीर्थजलानि सन्ति ।

रघुः—अयि तपोधन! एते जानपदाः कडङ्करीयाः पशवः किं वः शरीरस्थितिसाधनं तद् वन्यं नीवारपाकादि तु न आमृशन्ति?

कौत्सः—राजन्! तव प्रसादात् जानपदास्तु रक्षन्ति एव अस्माकं धान्यधनम् ।

रघुः—भो विद्वन्! अपि अधीतं यदध्येतव्यं भवता महर्षिचरणेषु?

कौत्सः—राजन्! कृपालुना गुरुणा अहं सकलाश्चतस्रः दश च विद्या अध्यापितः ।

रघुः—तत्तपोधन! कच्चित् प्रसन्नेन महर्षिणा त्वं सम्यग् विनीय गृहाय अनुमतः? यतः तं सर्वोपकारक्षमं द्वितीयम् आश्रमं सङ्क्रमितुम् अयं ते कालः ।

कौत्सः—यथाह कोसलेश्वरः। दीक्षान्ते समावर्तनेन विधिनाऽहं गुरुणा गृहाय विसृष्टः ।

रघुः—भगवन्! एवंभूतस्य अर्हतमस्य तव आगमनेनैव मे मनसः तृप्तिर्न भवति। किमत्र मया विधेयम् इत्यपि आज्ञापय। किं भवान् शासितुराज्ञया उताहो आत्मनैव मां संभावयितुं वनाद् इह प्राप्तः?

कौत्सः—महाभाग! यद्यपि प्रतीक्ष्येषु भक्तिस्ते कुलोचितैव तथापि त्वं तया तावत् स्वपूर्वानपि अतिशेषे। इहाद्य किञ्चिद् विलम्ब्य आगतस्य मे आगमनप्रयोजनमेव निष्फलं जातमतः न तन्निवेदयिष्ये ।

रघुः—मैवं विद्वन्! धारयत्येव अधुनाऽपि दिलीपसूनुः प्राणान् तत् किमिति प्रयोजनमेव निष्फलमिति वदसि। ननु स्वैरमुच्यताम् कथमागतो भवानिति।

कौत्सः—साधु नरेन्द्र! तीर्थप्रतिपादितर्द्धिः शरीरमात्रेण तिष्ठन्नपि भूयिष्ठमाभासि। भवान् एकनराधिपः सन् एतत् मखजम् अकिंचनत्वं स्थाने व्यनक्ति। सुरैः पर्यायपीतस्य हिमांशोः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कलाक्षयः वृद्धेरपि श्लाघ्यतरः। विषादस्तु मे अयमेव यदहं भवन्तं गुर्वर्थम् अर्थिभावाद् व्यतीतकालः अभ्युपेत इति।

रघुः—भोस्तपोधन! गुर्वर्थं किं कियद् वा धनम् इच्छति भवान्? श्रोतुं तावदिच्छामि।

कौत्सः—राजन्! विद्यां परिसमाप्य अथ मया महर्षिः गुरुर्दक्षिणायै विज्ञापितोऽभूत्, किन्तु दयालुरसौ चिराय अस्खलितोपचारां मे तां भक्तिमेव पुरस्ताद् अगणयत्।

रघुः—साधु विद्वन्! कुतो गुरुभक्तिं विना इयती विद्यावाप्तिः। अथ ततस्ततः?

कौत्सः—मयि पुनः निर्बन्धपरे किञ्चित् सञ्जातरुषा गुरुणा मदीयमर्थकार्श्यमचिन्तयित्वैव अहम् उक्तः—"गृहीतविद्यापरिसंख्यया वित्तस्य चतस्रः दश च कोटीः मे आहरेति।" तदर्थमेव इहागतः। अथ सपर्याविधिभाजनेन भवन्तं प्रभुशब्दशेषं मत्वा स्वविद्या-मूल्यस्य विपुलतां च विचार्य संप्रति भवन्तम् उपरोद्धुं नोत्सहे—

तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये।
स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि॥

(इति उत्थातुमिच्छति)

रघुः—(वर्जयन्) मैवं भोस्तपोधन! मदीये महिते प्रशस्तेऽस्मिन्नग्न्यागारे चतुर्थोऽग्निरिव वसन् द्वित्राण्यहानि सोढुम् अर्हसि त्वम्। यावदहं त्वदर्थं साधयितुं यते। पश्य विद्वन्!

गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम्।
गतो वदान्यान्तरमित्ययं मे माभूत् परीवादनवावतारः॥

कौत्सः—यथेच्छति कोसलेश्वरः।

रघुः—सुव्रत! धर्माध्यक्षं मद्वचनाद् ब्रूहि साधु समाचरितव्योऽतिथिरिति।

दौवारिकः—यथाऽऽज्ञापयति देवः।

(निष्क्रान्तः)

रघुः—(परिक्रम्य स्वगतम्) साम्प्रतं तु गृहीतसारा निखिला वसुमती। कुतो नु खलु इयान् स्वर्णराशिः लभ्येत। भवतु कुबेरं विजित्य ततः समाहरिष्ये एतद् धनम्। श्वस्तावद् राजराजोऽभियातव्यः। भगवतः वसिष्ठस्य मन्त्राणां प्रभावात् मे रथस्य गति-रुदन्वदाकाशमहीधरेष्वपि न विहन्यते। (प्रकाशम्) सुव्रत!

दौवारिकः—(प्रविश्य) देव! अयमस्मि आज्ञापयतु देवः।

रघुः—सुषेणं सारथिं ब्रूहि श्वः कैलासपतिः कुबेरः अभियोक्ष्यते। अतः प्रातरेव सज्जो रथ उपस्थापयितव्य इति।

दौवारिकः—यथाऽऽज्ञापयति देवः।

(निष्क्रान्तः)

(पटाक्षेपः)

(ततः प्रविशति उच्चैर्हसन् कोषाध्यक्षः)

कोषाध्यक्षः—हन्त! आश्चर्यं भोः!! आश्चर्यम्!!! देवा अपि कोसलेश्वराय अधीना राजान इव बलिं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रयच्छन्ति । अद्य रात्रौ तावत् नभस्तः कोषगृहस्य मध्ये अपूर्वा अतिभूयसी हिरण्मयी वृष्टिरभूत् । तद् यावद् महाराजाय निवेदयामि । (निष्क्रान्तः)

(ततः प्रविशति रघुः कौत्सेन सह)

रघुः—भगवन् ! आश्चर्यं, भीतात् कुबेरात् रात्रावेव महती हिरण्मयी वृष्टिः कोषगृहे जाता ।

कौत्सः—राजन् !

किमत्र चित्रं यदि कामसूर्भूवृत्ते स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ॥

रघुः—तद् विद्वन् ! कुबेराल्लब्धोऽयं समस्तो भासुरहेमराशिः स्वीक्रियतां भवता ।

कौत्सः—राजन् ! मया गुरवे केवलं दीनाराणां चतुर्दशसहस्रकमेव प्रदेयम् । अतस्तन्मात्रमेव मया ग्रहीष्यते । नैकमप्यधिकम् ।

रघुः—सुव्रत !

दौवारिकः—देव ! अयमस्मि । आज्ञापयतु देवः ।

रघुः—मद्वचनाद् ब्रूहि कोषाध्यक्षं 'समस्तोऽसौ हिरण्यराशिः उष्ट्रवामीशतैर्वाहयित्वा महर्षेर्वरतन्तोराश्रमं प्रापयितव्य इति ।

दौवारिकः—यथाज्ञापयति देवः ।

रघुः—भगवन् ! किमधिकं भवतः प्रियमनेन जनेन क्रियेत केवलमनुगृहीतमात्मानं मन्ये ।

कौत्सः—राजन् ।

आशास्यमन्यत् पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥

(पटाक्षेपः)

समाप्तं वीरवदान्यं नाम नाटकम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मदनदहनम्

पं० श्रीरमेशखेर, मुम्बई

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रस्तावना

कविकुलगुरुकालिदासविरचितस्य कुमारसंभवस्य तृतीयं सर्गमाश्रित्य 'मदनदहनम्' इत्येकाङ्करूपा प्रवेशद्वयात्मिका संगीतप्रधाना नाटिका विलिखितास्ति । अस्याः प्रथमः प्रयोगो विल्सन-महाविद्यालये संस्कृतमण्डल(Sanskrit Seminar)द्वारा विहितः । कृतं च तस्य प्रयोगस्य दिग्दर्शनं विविधसंस्कृतनाटकानां समीचीनप्रयोगविधानेन संप्राप्तकीर्त्या ब्राह्मणसभाया दिग्दर्शक-वरैः श्रीकृष्णचन्द्रमोरेश्वरैः तथा दाजीभाटबड़ेकरमहोदयैः । अस्मिन् प्रयोगविधाने सिद्धता-(rehearsal) समये कृतेन भोजनपानादीनामपि व्ययेन सह रूप्यकशतं संहितो व्ययोऽभूत् । तत्रापि मुम्बापुर्यां प्रयोगोपकरणभूतानां लतानां पुष्पादीनां च महार्घता व्ययवृद्धेः कारणमासीत् ।

मदनदहनान्तर्गताः सर्वेऽपि श्लोकाः प्रायेण वृत्तबद्धा अपि स्वरतालादिसंगीतविशेषव्यपा-श्रयेण गेयाः सन्ति । अतः सर्वेषां श्लोकानां शिरोदेशे तत्तत्स्वरतालनिर्देशः कृतोऽस्ति । अत्र क्व-चिदनुष्टुप्छन्दसि विरचिताः श्लोका अपवादभूताः । ते च स्वरसामान्येन गीयन्ते ।

मुम्बापुरीनभोवाणीद्वारापि नाटिकेयं श्राविता । प्रयोगविधाने ध्वनिक्षेपणे च कालमर्यादा घटिकार्धपर्यन्तमेवासीत् ।

द्वितीये प्रवेशे प्राक् पञ्चमात् श्लोकात् वनोद्देशे वसन्तश्रिय आगमनं शिवेन च तृतीयने-त्रोन्मीलनेन मदनस्य भस्मीकरणमिति दृश्यद्वयं कथं दर्शनीयमिति नाद्युनिकरङ्गभूमौ समस्या तिष्ठति । रङ्गमञ्चस्योपर्यादावेव निबद्धानां सामाजिकैरदृष्टपूर्वाणां कुसुमयुतानां लतानां यथाकाल-मधोविमोक्षः प्रथमं दृश्यं सूचयेत् । द्वितीयं च सूचयितुं कृत्रिमः कार्पासो नेत्रः शिवस्य ललाटे स्थाप-नीयः । तन्मध्ये चाल्पमात्रो विद्युद्गोलको (electric bulb) विनिवेश्यः । शिवस्य जटाजूटे निलीना विद्युद्वाहिनी (electric wire) न प्रेक्षकाणां गोचरीभवेत् । यथाकालं च प्रचालिते विद्युत्प्रवाहे कार्पासनेत्राच्च प्रसृतायां किरणशलाकायां मदनेन रङ्गमञ्चे स्थापितस्य कृत्रिमपर्वतकस्य (hillock) पश्चाद्देशे निपतितव्यम् । तस्मिन्नेव काले धूपादीनां धूमो नेपथ्याद्रङ्गमञ्चे समुत्सार-यितव्यो येन दहनाभासो भवेत् ।

———

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अथ

मदनदहनम्

यस्य सर्वरसिकैः कलाकृतिः
श्लाघ्यते बहु 'कुमारसंभवम्' ।
कालिदासमभिवाद्य तं मया
गीयते हरकथा यथामति ॥

[ततः प्रविशत्यस्वस्थचित्त इतस्ततः परिक्रामन्निन्द्रः । विभवतश्च परिवारः]

प्रतिहारी—(प्रविश्य)

[रागः—हमीरतालः—द्रुत एकतालः]

जयतु जयतु भूपो भूषितद्वारदेशः
कुसुमसुरभिमौर्वीसक्तरोलम्बरेखः ।
स्वरथ इव रतीशः प्रीणयन्नासमन्तं
तव शिरसि निदेशं धर्तुमुत्कण्ठतेऽयम् ॥१॥

इन्द्रः—

[रागः—बिहाग]

नन्दनाधिपतेः कामं कामस्य परिपूर्तये ।
समायातं न भद्रे त्वं विलम्बयितुमर्हसि ॥२॥

[प्रतिहारी निष्क्रामति]

[रागः—पटदीपतालः—त्रितालः]

तारकस्य खलु मारणे रणे
मार एव भवतां समाश्रयः ।
यः शरव्यमुपकल्प्य तं शिवं
साध्नुयाद्दिविषदां ध्रुवं शिवम् ॥३॥
श्रोत्रपेयमिति मङ्गलं वचो
यावदन्तमगमन्न वेधसः ।
तावदेव मम दूततल्लजो
वर्त्मनोऽन्तमभजच्च कर्मणः ॥४॥

प्रतिहारी—(मदनेन सह पुनः प्रविश्य । तं प्रति)

[रागः—भूपः]

सिंहासनोपविष्टस्त्वां सहस्राक्षः प्रतीक्षते ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मदनः— (इन्द्रं प्रति)

विजयस्व सदा राजन् कामोऽहमभिवादये ॥५॥

इन्द्रः— (सहर्षमासनादुत्थाय)

[रागः—केदारःतालः—द्रुत-एकतालः]

रमणीरमणीयविभ्रमाणा-
मित आगच्छ गुरुस्त्वमेकदेशम् ।
मम भूषय चासनस्य सेर्ष्य-
मचलीढोऽपि जयन्तधीक्षणाभ्याम् ॥६॥

मदनः— (सस्मितम्)

[रागः—मालकंसः]

इमं हि बलमित्त्वयाश्रितजनादरं व्यञ्जता
विनैव वचनात्कृतेः कठिनता प्रकाशीकृता ।
तदादिश समीहितं कलय तत्समीपे स्थित-
मिदं हि कृतमण्डलं तव मुदेऽस्ति मे कार्मुकम् ॥७॥

[रागः—गोरखकल्याणः तालः—त्रितालः]

सर्वसुखानि विहाय पदाय यतिर्यदि कश्चन ते यतते
तस्य विधातुममोघबलं ननु विघ्नमनल्पतपश्चरणे ।
काञ्चनकान्तनितान्तमनोहरविग्रहचञ्चलनेत्रभृतो
रूपविशेषयुता वनिता मम साह्यकृतो भयमत्र कुतः ॥८॥

[रागः—चन्द्रकंसः तालः—दादरा]

प्रलापनेन वा कृतं
वसन्तमात्रसाह्यकृत् ।
पिनाकपाणिमप्यहं
जयामि पुष्पसायकः ॥९॥

इन्द्रः— (सहर्षम्)

[रागः—मिश्र-कॉफी तालः—रूपकः]

कन्दर्प दर्प उचितस्तव नूनमेष
संभाव्यते त्वयि न किं कुसुमायुधेऽपि ।
चित्रं फलाधिगमनं च विनैव याच्ञां
सत्यं त्वयातिशयितो मम कल्पवृक्षः ॥१०॥
कृशानुरेतसो जातो रेतसस्तारकासुरम् ।
तन्नामाक्षरसंख्यात्वं संख्ये नेष्यति निश्चितम् ॥११॥

[रागः—नन्दः तालः—दादरा]

शरैः शैलजां शीतकान्तिं शुभाङ्गीं
शिवाराधनायां च शं शञ्चमानाम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शरच्चन्द्रशोभां शुचिस्मेरवक्त्रां
शिवेनैव नः शर्व* साकं शिवाय ।।१२।।

[रागः-भूपः]

मदनः—मुञ्च मुञ्च मनसो विकलत्वं को हि नास्ति विषयो धनुषो मे ।
मण्डलीकृतमनोजनिचाप आशयं शयगतं स्वमवेहि ॥१३॥

(रागः- तिलंगः, तालः-त्रितालः)

रूपसम्पदां शेवधी रतिः
कोकिलाप्रियोऽसौ मधुः सखा ।
पञ्च सायका लक्ष्यवेधिनः
साधयामि ते कार्यसिद्धये ॥१४॥

[इति निष्क्रान्तः]

[इति प्रथमः प्रवेशः]

———

अथ

द्वितीयः प्रवेशः

(ततः प्रविशति मदनो रतिर्वसन्तश्च)

मदनः—[रागः—मिश्रकाफी, तालः—दादरा]

कृते जयस्य मेऽधुना प्रफुल्लपादपादिभि-
स्त्वया मधो वनस्थली समन्ततो विभूष्यताम् ।
दिवौकसोऽपि यं महान्तमाभजन्ति शङ्करं
भयङ्करः स मेऽधुना शरस्य लक्ष्यतां व्रजेत् ॥१॥

[नेपथ्ये 'ॐ नमः शिवाय' इति प्रमथानां घोषः श्रूयते । ततः रङ्गमञ्चस्य वामः कोनः प्रकाशितो भवति ध्यानमग्नश्च शिवः सामाजिकानां दृष्टिपथमायाति ।]

[रागः-देसकारः]

वसन्तः—(:स्वगतम् ।)

ध्यानाविष्टान्तरङ्गं पदनखमहसा वेदिकां भूषयन्तं
? शंसन्तं लोमराज्या हृदयविततया दग्धचेतोविकारान् ।

---

* शर्व् (शर्वति) = हन् (हन्ति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गङ्गाधारां पतन्तीं शिरसि धवलया ह्रेपयन्तं स्वकान्त्या
योगेशं किं गिरीशं विदधति विशिखा वीतधैर्यं स्मरस्य ॥२॥
[रागः-पूरिया, तालः-त्रितालः]

मदनः—(सनिर्वेदम् ।)
जटाजूटे माल्यं विरचयितुमस्य प्रणयतः
कपाले भस्माक्ते मृगमदविभूषां च यमिनः ।
गले भोगिग्रस्ते भुजयुगलमाधातुमतुला
न साक्षाच्छक्तेयं रतिरपि कुतो मेऽद्य विजयः ॥३॥
[इति कार्मुकं त्यजति ।]

वसन्तः— [रागः- मधुवन्ती]
स्मर स्मर स्वं वचनं प्रगल्भं तवाद्यधर्मं च तथा सुधर्माम् ।
शरासनं स्रस्तमिदं गृहाण प्रेक्षस्व मे स्वैरविजृम्भितं च ॥४॥
[इति निष्क्रामति ।]

मदनः—(समन्तादवलोक्य । सहर्षम्)
[रागः—वसन्तवहारः]
प्रेक्षस्वेमं हन्त पुष्पाकरस्य
कान्तारेऽस्मिन् मोहजालप्रभावम् ।
श्रेष्ठानां हि प्रायशो धर्म एष
स्वार्थं त्यक्त्वा मित्रकार्यस्य सिद्धिः ॥५॥

रतिः—(नृत्यन्ती) [रागः—जिल्हा-काफी, तालः—केरवा]*
कलरवकूजितमोहितकाननकोकिल उत्सुक आर्तम् ।
पल्लवपिहिततनुर्गायति काङ्क्षति सख्या रतिसौख्यम् ॥६॥
सुरतविलासकलासु कपोतः कुशलसखीमनुनयति ।
यौवनमत्तवृषो मुकुलेक्षणगोकण्डूयनकामी ॥७॥
कोमलकिसलयकान्तिविनिर्जितशुकमुखरक्ताशोकः ।
वाञ्छति नूपुरशिञ्जितमुखरितरमणीचरणाघातम् ॥८॥
त्यज लघु मानिनि मन्युमिदानीं संप्राप्तो मधुमासः ।
मनसिजमित्रमिति प्रेमी प्रार्थयते निजकान्ताम् ॥९॥

शिवः—(अक्षिण्युन्मील्य समन्तादवलोक्य साश्चर्यम्)
[रागः—देसः, तालः—झपतालः]
आर्तवी माधवी सृष्टिशोभा कुतो
गन्धवाहः कथं वात्ययं नूतनः ।

---

*नृत्यानुकूलं स्वरतालरचनाविशेषमाश्रित्य
गीतमिदं विरचितमस्ति । न तु कमपि छन्दोविशेषम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मत्समाधौ पुनः पूर्वभङ्गः कथ-
मिन्द्रियाणां तथा चञ्चला विक्रिया ॥१०॥

[ततः प्रविशति सखीद्वितीया पार्वती]

रतिः—पूजापात्रकरायाता सहाल्या शैलकन्यका ।
साक्षाद्देहधरा सिद्धिस्तवैषा मीनकेतन ॥११॥

पार्वती—(शिवमुपसृत्य)

[रागः—तिलक-कामोदः, तालः—त्रितालः]

जयतु जयतु देवो भूतनाथोऽद्वितीयः
पदकमलनतानामापदां नाशहेतुः ।
हिमगिरिदुहितैषा सादरं स्वां सपर्यां
वितरति तव पादे भक्तिमात्राधिगम्ये ॥१२॥

[इति तथा करोति]

मदनः—(शरसन्धानं नाटयित्वा)

[रागः—गारा, तालः—त्रितालः]

कुलशैलसुताकुचयुग्मतले
करिकुम्भसमे पतिताक्षियुगम् ।
शिवमद्य विधास्यति मे विशिखो
धुरि कामिजनेषु वसन्तमयम् ॥१३॥

शिवः—(पार्वतीं सस्पृहमवलोक्य)

[रागः—खमाजः, तालः—अद्धा]

इयं शैलजा यौवने राजमाना स्तनोत्सेधमावृत्य चोलेन चारुम् ।
विभातीव कौसुम्भरागेण रागं मनोजालजातं बहिर्दर्शयन्ती ॥१४॥

(आत्मानं संस्तभ्य)

[रागः अडाणा]

धिग्धिक्कष्टं निरलमतुलं निर्विकल्पे समाधौ
मां सामान्यं जनमिव कथं पीडयन्ते विकाराः ।
किं वा सृष्टेः प्रलय उदितो भ्रामयम् भूतमात्रं
नूनं मन्ये भवति सुमहांश्चित्तचाञ्चल्यहेतुः ॥१५॥

(मदनं प्रेक्ष्य सक्रोधम्)

[रागः—श्रीः]

दुष्ट जानेऽधुना धाष्ट्र्यमेतत्तव
काम धामान्तिमं धाम फालाक्षिजम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[आकाशे

हर हर निजमन्युं सर्वदेवा नताङ्गाः
शिरसि भयविमूढा अञ्जलीन् धारयन्तः।
मनसिजमपराद्धं त्वं क्षमस्वेति दीनं
चरणशरणयाताः प्रार्थयन्ते शरण्य ॥

(आकाश-भाषितं दुर्लक्ष्य पुनः पूर्वोक्तं पठित्वा)

मत्तपः पावकस्येव दीर्घा शिखा
त्वां नयत्याशु निन्द्याशुगैर्गर्वितम् ॥१६-१७॥

[इति तृतीयं नेत्रमुन्मील्य मदनं दहति]

रतिः—(सवाष्पम्)

[रागः—जोगिया]

अहहाशनिपातदारुणं किमिदं मे पुरतो विलोक्यते ।
अयि किं विजहासि मां प्रियं क्षणमेकं विरमागता रतिः॥१८॥

इति द्वितीयः प्रवेशः

समाप्ता चेयं 'मदनदहनम्' नाम नाटिका

—:०:—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः

एकाङ्कि-नाटकम्

श्रीवनेश्वरपाठकः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः

प्रथमं दृश्यम्

(अवन्तिनरेशविक्रमादित्यस्य राज-सभा राजा मन्त्री उपाध्यायो वररुचिः, अन्ये सभासदश्च यथावेषं यथास्थानमुपविष्टाः)

राजा— उपाध्याय-वररुचे ! राजकुमारीप्रियङ्गुमञ्जर्या अध्ययनन्तु समाप्तम् ?

वररुचिः—महाराज ! सा असाधारणविदुषी सम्पन्ना ।

राजा— एतदर्थमहं भवतः कृतज्ञोऽस्मि । इदानीमहं तस्या विवाहार्थं सचिन्तः ।

वररुचिः—महाराज ! तया तु स्वविवाहविषये एका प्रतिज्ञा कृता ।

राजा— कीदृशी प्रतिज्ञा उपाध्याय !

वररुचिः—अद्य प्रातः राजकुमारीप्रियङ्गुमञ्जर्याः प्रियसहचरी आम्रमञ्जरी मत्सकाशमागताः। तया कथितं यत्—"महाराजो राजकुमार्या विवाहं सिंहलद्वीपनिवासिना राजकुमारेण कुमारसेनेन सह कर्तुमिच्छति किन्तु राजकुमार्या एष निश्चयो यत् शास्त्रार्थे यो मां पराजेष्यते तेनैव सह अहं विवाहं करिष्यामीति । अतः सा उपाध्यायचरणेषु निवेदयति यत् भवान् कथमपि महाराजाय निवेदयतु दृढनिश्चयमिमम् । तस्याः स्वयं कथने संकोचः ।"

राजा— अत्र संकोचस्य का वार्त्ता ? अहन्तु पुत्र्या निश्चयमिमं ज्ञात्वा हर्षमनुभवामि । उपाध्याय ! नातिचिरं विदुषामेका सभा कारयितव्या । अनेन व्यपदेशेनाहं पुत्र्याः विदुषाञ्च परीक्षां कर्त्तुमिच्छामि । अत्र भवता निर्णायकेन भवितव्यम् ।

वररुचिः—अहं सहर्षं स्वीकरोमि ।

राजा— तर्हि त्वरितमिदं कार्यमनुष्ठीयताम् ।

वररुचिः—यत्प्रभविष्णवे रोचते ।

(राजानमनूत्तिष्ठन्ति सर्वे । जवनिकापातः)

द्वितीयं दृश्यम्

(सभा-भवनम् :—सर्वे विद्वान्सश्चिन्ताकृतयोऽवनतमुखा उपविष्टाः)

वररुचिः—(प्रविश्य) महदिदं दुःखं यदद्य मम निर्णयस्योपहासः कृतः । एष भवतां पराजयो न मम पराजयः । अहं तामभिमानिनीं राजकुमारीमवश्यमेव दण्डयिष्यामि । शिष्यया गुरोरयमपमानः ! सभामध्ये मामपहसन्त्या तया निगदितम्—"उपाध्याय ! भवानिदं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रहस्यं न जानाति।" रहस्यस्य वत्से! अपनयामि तव दुर्वैदग्ध्यजनितां दुर्विनीततामिमाम्। महामूर्खेण सह तव विवाहं कारयामि, तदा मम नाम वररुचिः। (विदुषः प्रति) गच्छन्तु भवन्तश्चिन्तां विहाय। एषोऽहं तस्या वरं महामूर्खमन्वेष्टुं निर्गतः। (द्रुततरगत्या निष्क्रान्तः)

(जवनिकापातः)

तृतीयं दृश्यम्

(वनप्रान्ते वररुचिः)

वररुचिः— (मूर्खमन्वेष्टुं परिभ्रमन्) कोऽपि मूर्खो न प्राप्तः। किं विक्रमराज्ये सर्व एव विद्वान्सः; न कोऽपि मूर्खः? (खटखटशब्दं श्रुत्वा स्वाधिष्ठितामेव शाखां मूलतश्छिन्दन्तं पुरुषं दृष्ट्वा) एष मूर्खः। (पुरुषं प्रति) अयि भ्रातः! तां शाखां मा छिन्धि नीचैः पतिष्यसि।

पुरुषः— (विहस्य) महामूर्खोऽसि। अहम् उच्चैः स्थितः कथं नीचैः पतिष्यामि?

वररुचिः—भवतु, न पतिष्यसि। नीचैरागच्छ एकमावश्यकं कार्यमस्ति।

पुरुषः— ऋजूक्त्या इदमेव कथं न कथयसि यदावश्यकं कार्यमस्ति। किं पुनः कथयसि 'नीचैः पतिष्यसि।' कथय किं कार्यमस्ति। अहं शाखया सहैव नीचैरागमिष्यामि।

वररुचिः—नीचैरवतर। तव विवाहं कारयिष्यामि।

पुरुषः— विवाहः ···मम विवाहः··· ··· (हर्षातिरेकेण नीचैः कूर्दते, आहतः अङ्गानि संस्पृशन्) अहो! महती पीडा। अहं विवाहं न करिष्यामि। पण्डितजीव! विवाहं न करिष्यामि। महती पीडा मे संजाता। आह·····!

वररुचिः—विवाहेन सर्वा पीडा अपगमिष्यति।

पुरुषः— पीडा अपगमिष्यति। तदाऽवश्यं विवाहं करिष्यामि। शीघ्रं कथय, कुत्र कया सह मम विवाहो भविष्यति।

वररुचिः—अस्यामेवोज्जयिन्यां राजकुमारीप्रियङ्गुमञ्जर्या सह।

पुरुषः— राजकुमारीपिङ्गु·····(हा! हा!! हा!!!) राजकुमारी·····ऐ·····(विस्मृतिमभिनीय)·····किं कथितम्?

वररुचिः—राजकुमारीप्रियङ्गुमञ्जरी।

पुरुषः— राजकुमारीपिङ्गु·····(हा! हा!! हा!!!) राजकुमारीपिङ्गु—कलिया, कलिया—राजकुमारी पिङ्गु, सुन्दरः संयोगः। पण्डितजीव! शीघ्रं विवाहं कारय।

वररुचिः—आगच्छ मया सह। यदहं कथयामि तदेव कुरु, तव विवाहो भविष्यति।

पुरुषः— पश्य पण्डितजीव! (भूमिं कर्णौ च स्पृष्ट्वा) यदेव कथयिष्यसि तदेव करिष्यामि। शीघ्रतां कुरु।

वररुचिः—आगच्छ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(उभौ निर्गच्छतः—जवनिकापातः)

चतुर्थं दृश्यम्

(राज-सभा—राजा राजकुमारो सभासदश्च यथास्थानं स्थिताः पण्डित-वेषधारिणा पुरुषेण सह वररुचिः प्रविशति)

वररुचिः—(हस्तमुद्यम्य) राजन्! स्वस्ति। अयं (पुरुषं निर्दिशन्) काशीनिवासी सर्व-शास्त्रार्थतत्त्वज्ञः सकलकलाकुशलो महापण्डितो धुरन्धरशास्त्री राजकुमार्या सह शास्त्रार्थं कर्त्तुमिहागतः। परन्त्विदानीमयं मौनव्रतधारी। अतः राजकुमारी यत्किञ्चित् प्रष्टुमिच्छति संकेतेन पृच्छतु। अयमपि तथैवोत्तरं दास्यति।

(राजकुमारी 'ईश्वर एक इति धिया' प्रश्ने स्वकीयामेकामङ्गुलिं दर्शयति। पुरुषः 'इयं ममैकमक्षि स्फोटयितुमिच्छन्तीति जानानस्तस्या अक्षिद्वयं स्फोटयितु-कामोऽङ्गुलिद्वयं प्रदर्शयति। राजकुमारी 'किं त्वया पञ्च ज्ञानेन्द्रियाणि वशे कृतानीति धिया' प्रश्ने पञ्चाङ्गुलीरुत्थापयति। पुरुषः 'इयं मह्यं चपेटिकां दातुमिच्छतीति मत्वा' मुष्टिं प्रदर्शयति।)

वररुचिः—(उत्थाय) मान्याः सभासदः! सम्भवतो भवन्तो रहस्यमयान् इमान् प्रश्नान् उत्तराणि च दृष्ट्वा विस्मिताः। अतोऽहं प्रश्नानुत्तराणि च स्पष्टीकरोमि। राजकुमार्या एकाङ्गुलेरुत्थापन-स्याशयोऽयं यत् 'ईश्वरः एकः।' विज्ञपण्डितोऽङ्गुलिद्वयं प्रदर्श्य सूचितवान् यदीश्वरः साकार-निराकारभेदेन द्विविधः। पुनः राजकुमार्या पञ्चाङ्गुलयः प्रदर्शिताः। अस्याशयो यत्—किं भवता पञ्चज्ञानेन्द्रियाणि वशीकृतानि।" विज्ञपण्डितेन मुष्टिमुद्यम्य सूचितं—'मया तानि मुष्टौ कृतानि।" (राजकुमारीं प्रति। अधुनाहं राजकुमारीं पृच्छामि—"किमेभिरुत्तरै-स्तस्याः सन्तोषो जातः?

(राजकुमारी न किञ्चिदुक्त्वा लज्जयाऽधोमुखी तिष्ठति)

वररुचिः—अहं विज्ञपण्डितस्यास्यां सफलतायां हार्दिकधन्यवादान् करोमि। महाराजं प्रति ममायम-नुरोधो यत् राजकुमार्या निश्चयानुसारं महापण्डितेनानेन सह तस्या विवाहः कार्यः।

राजा—अहमतीव प्रसन्नः। (मन्त्रिणं प्रति) मन्त्रिप्रवर! विवाहोत्सवस्य प्रबन्धः क्रियताम्।

मन्त्री—(उत्थाय) यदाज्ञापयति महाराजः।

(सर्वे उत्तिष्ठन्ति जवनिकापातः)

पञ्चमं दृश्यम्

(राजकुमार्याः कक्षः—एकासने उपविष्टौ राजकुमारी पुरुषश्च)

राजकुमारी—भवान् वदति कथं न?

पुरुषः—वररुचिपण्डितेनाहं मौनमवलम्बयितुमादिष्टः।

राजकुमारी—किं कारणम्?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुरुषः—स कथयति त्वं मूर्खः, अतो न किञ्चिद् वक्तव्यम् त्वया ।
राजकुमारी—(ससंभ्रममुत्थाय पुरुषं पश्यन्ती) किं त्वं मूर्खः ?
पुरुषः—न हि राजकुमारीपिङ्गु ! अहं धुन्धरशास्त्री महापण्डितः ।
राजकुमारी—(सक्रोधम्) राजकुमारीपिङ्गु ...धुन्धरशास्त्री... । निर्गच्छ मम गृहात् ।
(अर्धचन्द्रं दत्वा तं गृहान्निःसारयति, पुरुषस्तस्या मुखमवलोकयन् तिष्ठति)

(जवनिकापातः)

षष्ठं दृश्यम्

(आचार्यस्याश्रमः—अध्ययनकक्षे उच्चासने आचार्यः यथास्थानं विद्यार्थिनः निचुलेन सह स पुरुषश्च)

आचार्यः—निचुल ! अयमागन्तुकस्त्वया कुत्र प्राप्तः ?
निचुलः—(उत्थाय) आचार्य ! अयमुज्जयिन्याः राजपथस्य पदमार्गे उपविष्टो रुदन्नासीत् । अस्य पत्नी इमं मूर्खं कथयित्वा गृहान्निष्कासितवती । अयं विद्वान् भवितुमिच्छति । अतोऽयं दयापरवशेन मयाऽऽश्रममानीतो यदयमप्यस्माभिः सहैव पठतु ।
आचार्यः—(हसन्तं दिङ्नागं दृष्ट्वा) दिङ्नाग ! त्वं कथं हससि ?
दिङ्नागः—(उत्थाय) आचार्य ! अयं मूर्खः । पत्न्या गृहान्निष्कासितः । पत्नीविरही कथमस्माभिः सह स्थास्यति कथं वा पठिष्यति ? वयं च अनेन सह कथं पठिष्यामः ?
आचार्यः—नहि, दिङ्नाग ! त्वं न जानासि ईदृश एव आहतः पुरुषो विद्यासंलग्नः प्रतिभावांश्च सम्पद्यते । अहमस्मिन् विचित्रामामां पश्यामि । ममान्तरात्मा कथयति यदयमसाधारणो विद्वान् भविष्यति । अहमाश्रमे अस्य स्थानं दास्यामि । (निचुलं प्रति) निचुल ! एष त्वया सह स्थास्यति । (पुरुषं प्रति) आगन्तुक ! तव किं नाम ?
पुरुषः—मां जनाः 'कलिया' इति कथयन्ति ।
आचार्यः—त्वमस्मिन्नाश्रमे रत्तितः । एकचित्तीभूय अध्ययने निरतो भव । प्रतिदिनं प्रातः स्नात्वा श्रीकालीदेव्या आराधनां कुरु । श्रीकालीकृपया त्वमचिरेण महान् विद्वान् भविष्यसि । अतः परं तव नाम न 'कलिया' अपि तु कालिदासो भविष्यति ।

(सर्वे उत्तिष्ठन्ति—जवनिकापातः)

सप्तमं दृश्यम्

(अध्ययनकक्षः--आचार्यः कालिदासश्च)

आचार्यः—श्रुतम् । अथ कविगोष्ठ्यां तव कविता सर्वैः सम्मानिता । निचुलः कथयति स्म यत् तादृशी कविता अद्यावधि न श्रुता । सा कीदृशी कविता आसीत् कालिदास !
कालिदासः—गुरुदेव ! इदानीमहं विरह-काव्य-रचनायां संलग्नः । तस्मिन् काव्ये एको विरही यक्ष अलकानिवासिनीं प्रियतमां प्रति मेघेन स्वकुशलसमाचारं प्रेषयति । अयमेव मम कल्पनाया विषयः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आचार्यः—तव कल्पनाया विषयस्तु विलक्षणः। अयं काव्यशैल्या नवीनावतारः—दूतकाव्य-रचना।

कालिदासः—किन्तु मम कविता दिङ्नागाय न रोचते। स मम काव्यं निन्दति।

आचार्यः—दिङ्नागस्तव विरोधी। तस्य चिन्ता न कार्या। मया तव कविता श्रुता। अहं सत्यं ब्रवीमि यद्-आदिकवेः वाल्मीकेः पश्चात् तव वाण्यामेव कविताया यथार्थरूपमवलोक्यते। त्वं वस्तुतः कविरसि। तव वाण्यां शाश्वतः सन्देशः। तस्मिन् दिने कवि-गोष्ठ्यां जनास्त्वां सरस्वत्याः पुरुषावतारमकथयन्, तत्समीचीनमेव प्रतिभाति। मम तु विश्वासो यत् यावदियं पृथिवी, यावत् पृथिव्यां साहित्यम्, यावच्च पृथिव्यां साहित्यरसिकास्तावत् तव वाणी संमाननीया भविष्यति। अहो! एका वार्त्ता तु मया विस्मृता। ह्यो राजभवने तव नवीनरचनायाः अभिज्ञानशाकुन्तलमितिनाटकस्याभिनयं दृष्ट्वा महाराजस्त्वयि एतादृशः प्रसन्नो यत् स सर्वेषां समक्षमुद्घोषितवान् यत् 'कालिदासो मम सभायाः रत्नेषु सर्वोच्चं स्थानमलङ्करोतु।" इदमपि श्रुतं यत् महाराजोऽद्य त्वां द्रष्टुं तथा पुत्र्याः कृते त्वां प्रसादयितुमिहागमिष्यति। कालिदास! इदं कदापि न विस्मर्तव्यं यत् राजकुमारीप्रियङ्गुमञ्जर्यास्त्वं कृतज्ञः। सा न तव पत्नी अपि तु प्रेरणा-शक्तिरस्ति तया देव्या साहित्यजगतो महान् उपकारः कृतः। तस्या एव कृपया अद्य संसारेण बहुमूल्यरत्नं कालिदासः प्राप्तः।

निचुलः—(प्रविश्य) गुरुदेव! महाराजविक्रमादित्यः आगच्छति।

आचार्यः—सादरं प्रवेशय। वयमत्रैव तस्य स्वागतं करिष्यामः।

निचुलः—यदाज्ञापयति गुरुदेवः। (निष्क्रम्य राज्ञा सह प्रविश्य) इत इतो महाराज! इत आगम्यताम्।

(राजा विक्रमादित्यो राजकुमार्या सभासद्भिश्च सह प्रविशति)

आचार्यः—वयमस्मिन्नाश्रमे महाराजस्य स्वागतं कुर्मः।

राजा— आचार्यचरणान् एष सपरिवारो विक्रमोऽभिवन्दते।

(शिरसाऽभिवन्दते)

आचार्यः—(हस्तमुद्यम्य) विजयतां महाराजः, लोककल्याणाय चिरञ्जीवतु।

राजा—अनुगृहीतोऽस्मि। (कालिदासं प्रति) अहं कृतापराधायाः पुत्र्याः कृते महाकवेः क्षमाप्रार्थी। पुत्रि! महाकविं प्रणम्य क्षमायाचनां कुरु।

राजकुमारी—(महाकवेश्चरणस्पर्शं कृत्वा) अस्ति कश्चिद्वाग्विशेषः?

कालिदासः—(पुस्तकमेकं हस्ते कृत्वा) अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(राजकुमारीहस्ते पुस्तकं दत्वा) इदं कुमारसम्भवं महाकाव्यम् ।

कालिदासः—(पुनः पुस्तकमेकमादाय) कश्चित्कान्ता विरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

(राजकुमारीहस्ते पुस्तकं दत्वा) इदं मेघदूतं गीतिकाव्यम् ।

कालिदासः -(पुनः पुस्तकं हस्ते कृत्वा) वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

(राजकुमारीहस्ते पुस्तकं दत्वा) इदं रघुवंशं महाकाव्यम् । (स्मितं कृत्वा)
अस्ति कश्चिद्वाग्विशेषः ।

राजकुमारी—महाकवेर्जयः ।

सर्वे—(समवेतस्वरेण) महाकवेर्जयः ।

(जवनिकापातः)

समाप्तिमगादिदमेकाङ्किनाटकं 'कालिदास':

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मदनदहनम्

पण्डितश्री रा० श० महाराजः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मदनदहनम्

प्रथमः प्रवेशः

बन्दिनः—भो भो महाभागाः ! अखण्ड-दण्डायमान-ब्रह्माण्डाधिपतिराखण्डलमहाराजः सभास्थान-मिदमलङ्करोति । तिष्ठत अवहिताः·····।

सर्वे—जयतु जयतु देवराजः ।

इन्द्रः—स्वागतं स्वानधीकारान् प्राप्तेभ्यः प्राज्यविक्रमाः युगपद्युगबाहुभ्यः, उपविशत यथास्थानम् ।

यमः—(त्वरया आगत्य) महाराज ! देवेन्द्र ! केयं दुर्दशा अस्माकम् । वरमस्मान् तृणतुलितान् अपमानितजीवितान्मरणम् ।

इन्द्रः—प्रेतेश !

यमः—महाराज ! वृथैव किमिति प्रेतेशशब्देन जनमिमं अवधीरयसि । नाहमधुना प्रेतेशः अपि तु प्रेत एव ।

इन्द्रः—ननु भोः ! शान्तं ब्रूहि ।

यमः—किं शान्तमिति । विभिन्नास्पदमेतत् कालोऽयं शान्तता चेति । यत्र तत्र विरही प्रियामिव तमेव मत्तं तारकासुरहतकं पश्यामि ।

इन्द्रः—अस्त्येतत् । तस्य तारकस्य त्रासेन त्रस्ताः सर्वे देवा गिरिगह्वरं सेवन्ते । त्रिभुवनतापकस्य तस्य विनाशे उपायं चिन्तयितुं संप्रत्येव विधातारं गत आसम् ।

सर्वे देवाः—दिष्ट्या जीवामस्तर्हि । समागतो नाम मृत्युः तारकस्य । कस्तर्हि उपायः संसूचितो देवेन पितामहेन···।

इन्द्रः—शङ्करस्य आत्मजात् नान्यः तन्नाशोपाय इति ।

वरुणः—मन्ये राजयक्ष्मणि कुर्मक्षीरमेवैकौषधं संसूचितं देवेन यतो ह्ययं

सती नाशात् उदासीनः सेवते निर्जनं वनम् ।
तिष्ठासति विरक्तश्च समाधावेव नित्यशः ॥
अतः चिन्तयामि अस्माकं मरणं ध्रुवम् ।

नारदः—ननु भोः किमत्र शोच्यम् । एष एव जगतो न्यायः यत् 'नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण' ।

इन्द्रः—मा भैष्ट ! देवाः मा भैष्ट, ब्रूत शङ्करः कुत्र तपस्तपति ?

यमः—किं तेन ?

इन्द्रः—प्रथममुत्तरं तावत् देहि । प्रयोजनमन्ततो शास्यसि ।

यमः—हिमालये । ततः किम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इन्द्रः—जानासि वा तस्य हिमालयस्य एका···

यमः—जानामि, जानामि। अस्ति तस्य एका कन्या।

वायुः—देवेन्द्र! मया विहरता दृष्टं तत् नयनयोस्तर्पणम्। यत्

असम्भृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य।
कामस्य पुष्पव्यतिरिक्तमस्त्रं तारुण्यमानन्दयतीव चित्तम्॥

सूर्यः—आ हा हा! किं कथयामि देव?

उन्मीलितं तूलिकयेव चित्रम्। नहि नहि
ममांशुभिर्भिन्नमिवारविन्दम्
पश्यामि तस्याश्चतुरस्रशोभि-
वपुर्विभिन्नं नवयौवनेन॥

यदि सा शङ्करं वृणुयात्·····

नारदः—अरे वृणुयात् किं? एवं ब्रूहि यदि शङ्करः तां वृणुयात् इति। यत् पिनाकपाणिं पतिमाप्तुमिच्छन्ती प्रति दिनं
अवचितबलिपुष्पा वेदिसम्मार्गदक्षा
नियमविधिजलानां बर्हिषां चोपनेत्री।
गिरिशमुपचरन्ती वर्तते सा सुकेशी
नियमितपरिखेदा तच्छिरश्चन्द्रपादैः॥

बृहस्पतिः—हन्त भोः! कोऽयं कामदेवस्य प्रभावः। येन सर्वेऽपि देवाः सांसारिकं दुःखजातं विस्मृत्य क्षणं आनन्दसागरे तरन्तीव। सहस्राक्ष! ततः किम्?

इन्द्रः—प्रलयङ्करेण शङ्करेण यदि तां नयनानन्दकरीं सुन्दरीं कश्चिदपि ग्राहयेत् तदाऽस्माकं कार्यं निश्चितं सेत्स्यति। अस्त्यत्र उर्वशी मेनका रंभा। किं सर्वा अपि अप्सरसः अधोवदना भूमिं उत्किरन्ति वृथैवेदं तर्हि वचनं यत् उर्वशी नाम सुकुमारं प्रहरणं इन्द्रलोकस्येति। अस्ति वा कश्चित् वीरवरः यः इदं दुष्करं कार्यं साधयेत् त्रिभुवनस्य त्रासं च क्षिणुयात्?

बृहस्पतिः—मघवन्! मन्ये, कठिनकठिनेऽस्मिन् कर्मणि नान्यः प्रभवति वीरवरात् कामदेवात्। तव अकुण्ठितमिदमस्त्रद्वयम्। एकं वज्रम् अपरश्च मदनदेवः।

इन्द्रः—साधु मन्त्रि बृहस्पते! साधु। सुष्ठु मन्त्रितम्। मदनो नाम मम बहिश्चराः प्राणाः येन अद्यावधि अनुरूपं द्वन्द्वं संयोजयता बहुशः पुण्यकर्म सञ्चितम्। कुत्र नु खलु स्यात् इदानीं प्रियो मे मदनः। अये! स्मरणादेवासौ उपस्थितः।

(ततः प्रविशति मदनः)

मदनः—अभिवादये दासोऽहं मनोभवः।

इन्द्रः—वत्स! चिरञ्जीव। स्मरणमात्रमेव उपपन्नो भाति अन्वर्थं ते नाम मनोभव इति। एहि इतस्तावदुपविश।

मदनः—आज्ञापय महाराज! अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितुमाज्ञया ते। अस्ति वा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कश्चित् तपस्वी यः इन्द्रपदमभिवाञ्छति ? कामिनीनां कटाक्षमात्रेणैव तस्य तपसो भङ्गं विधास्यामि । मुक्तिमार्गं प्रपन्नमपि वनितानां चतुरैः कटाक्षैः बद्धुं समर्थोऽयं ते दासः ।

इन्द्रः—नहि, नहि, मदन ! नेदृशः कोऽपि मम शत्रुपक्षे स्थितः ।

मदनः—आज्ञापय देवदेव ! निःसंकोचं आज्ञापय । तव प्रसादात् कुसुमायुधोऽपि सहायकमेकं लब्ध्वा कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ?

(सर्वे करतालिकां कुर्वन्ति)

इन्द्रः मदन ! मनोगतं शंसता त्वया अस्माकं कार्यं प्रतिपन्नकल्पम् । अस्माकं देवानां इदमेव कार्यं यत् शिवपार्वत्योर्विवाहः । यदि स भस्मोद्धूलितविग्रहः पार्वत्यां आत्मजम् उत्पादयेत् तदैव देवानां तारकस्य त्रासान्मुक्तिर्भवेत् ।

मदनः—तर्हि साधयामो वयम् ।

इन्द्रः—तद्गच्छ सिद्ध्यै कुरु देवकार्यम् ।
साह्यार्थं वयमपि त्वाम् अनुसराम एव ।

मदनः—न काऽपि आवश्यकता । देव ! पश्य अहम् एकाकी एव तव कार्यं साधयामि ।

इन्द्रः—सर्वं सखे ! त्वय्युपपन्नमेतत् । उभे ममास्त्रे कुलिशं भवांश्च वज्रं तपो वीर्यमहत्सुकुण्ठं त्वं सर्वतोगामि च साधकं च । शुभास्ते पन्थानः सन्तु । (मदनः अभिवाद्य गच्छति)

द्वितीयः प्रवेशः

(रतिः प्रविशति)

रतिः—अहो ! निर्मला रजनी (पूर्णचन्द्रं विलोक्य) मोदभरेण परिहसतीव जगन्मण्डलम् । सर्वेयं सृष्टिः चन्द्रिकया दुग्धधवला हसतीव । (परिक्रम्यावलोक्य च आकाशे—आकर्ण्य) किं वदसि कोकिले ! कथं त्वमपि प्रियं प्रतीक्षमाणैव अद्यापि तिष्ठसीति । नूनम् आगमिष्यत्येव मे प्राणप्रियः अधुना । अये ! किमिदं, कुत्र गतः स चन्द्रमाः रजनीं विहाय । मेघैरन्तरितः । हतकमेघ ! को नाम ते लाभः अनेन विघ्नसन्तोषेण ? केवलं तामस आनन्द एव नु । अथ वा किं तवेयं क्रीडा । अनया तव क्रीडया कुसुमसुकुमारं तरुणरमणीनां चित्तं विदीर्यते । हन्त भोः ! समागतः पुनरपि चन्द्रमाः । परं कथम् अद्यापि मे प्राणप्रियो नायाति ? अये ! स्फुरति च मे दक्षिणं नेत्रम् ! भृशं कोपिष्यामि यदि तमवलोकयन्ती आत्मनः प्रभविष्यामि । दिष्ट्या आगतो मे प्राणेश्वरः ।

मदनः—प्रिये ! परिदुर्मनायितेव लक्ष्यसे ।

रतिः—का ते प्रिया ?

मदनः—(स्वगतम्) नूनं कुपिता मे प्रेयसी विलम्बमसहमाना (प्रकाशं) मदनवल्लभे ! किमेतत् ? एतानि ते आभरणहीनानि अङ्गानि निरलङ्कारं काव्यमिव न शोभन्ते । इदं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तव पूर्णिमाचन्द्रमुखं 'अन्तर्हिते शशिनि कुमुद्वतीवदनमिव' निष्प्रभं संवृत्तम्। एते ते मुक्तालकाः शोकमिव परिखेदं प्रस्रवन्ति। ब्रूहि सखि! किं ते प्रियं करिष्यामि येन तव सन्तोषो भवेत्।

रतिः—वचने का दरिद्रता। केवलमाश्वासयसि। परन्तु—

मदनः—कोऽयं ते परन्तुः?

रतिः—जानासि नाम इमा रात्र्याः पञ्चदशघटिका वर्षाणीव मां प्रतिभान्ति। कथं त्वां विना निर्वाहयामि इति मामुपेक्ष्य परिभ्रमसि तथापि प्राणप्रियेति संबोधयसि? अहो धैर्यम्। अहमेव मन्दभागिनी।

मदनः—प्रिये! मैवं मंस्थाः। त्वय्येव दृढानुरक्तोऽयं जनः। देवेन्द्रेण आहूतः तत्र गत आसमित्येवासम्भावितं विलम्बकारणमद्य।

रतिः—किमर्थं को वा तपस्वी विप्रलभ्यः। तपश्चरणात् च प्रच्याव्यः। महतां सेवनं नाम प्राणैः सह क्रीडनम्।

मदनः—न केवलं तपस्वी।

रतिः—कस्य तर्हि तपोभङ्ग अपेक्षते देवेन्द्रः?

मदनः—शङ्करस्य।

रतिः—शंकरस्य!...शं...क...र...स्य...शं...क...

(इति मूर्च्छति)

मदनः—समाश्वसिहि प्रिये! समाश्वसिहि।

रतिः—(समाश्वस्य) कुत्र मे प्राणनाथः? प्राणनाथ! अधुना वयम् अत्रैव सुखेन चिरं वसामः। विरहकल्पनयाऽपि मे चित्तं कल्पते।

मदनः—मुग्धे! किमिति वृथैव कातरा भवसि। त्वां विना क्षणमपि अहं कुत्रापि स्थातुं नोत्सहे। परं कार्यान्तरमन्तरेण गन्तव्यं भवति।

रतिः—नाथ! अपि नाम सत्यमिदम्?

मदनः—त्वां प्रति अपि नाम अनृतमभिधास्यति मदनः!

रतिः—तर्हि इमं कुसुमचापं दूरं क्षिपत। नाधुना प्रयोजनं कुसुमबाणैः। वयमत्रतः स्वर्लोकात् कुत्रापि दूरदूरं देशं व्रजामः। यत्र कर्तव्यं किं अकर्तव्यं किमपि न स्यात्। धर्मस्य अधर्मस्य वा कल्पनापि नोदिता भवेत्। निर्जनं स्थानं समासाद्य अपुनर्लभ्यमिदं तारुण्यसुखं आकण्ठम् अनुभवामः।

मदनः—सखि! किं नाम शंकराद्बिभेति भवती। को नाम शङ्करः मत्पुरतः। अद्य यावत् श्रेष्ठाः ज्येष्ठाः तपस्विनः अनेन मदनेन पराभूताः। कदापि कुत्रापि पराभवं न जानाति मदनः। मन्ये पञ्चबाणः इति मे अभिधा मृषैव। वस्तुतस्तु एकबाण एवाहम्। दृढमाशासे यत् शङ्करोऽपि मे बाणैकमात्रेण विधेयः स्यादिति।

रतिः—नाथ! नासौ शङ्करः। प्रत्युत संहारकर्ताऽसौ इत्येव कम्पे।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मदनः—प्रिये ! अहमेव तस्य शं करोमि पार्वतीपरिणयेन देवानां च तस्य आत्मजेन तारकासुरं नाशयित्वा ।

रतिः—आर्य ! पादयोः पतामि । विरम अस्मात् साहसात् ।

मदनः—नैतत् शक्यम् ! स एवं शूरः यः बलिशालिनोऽपि शत्रोर्न बिभेति ।
विश्वसिहि अस्य अमोघस्य मे शरस्य शङ्करः अचिरादेव लक्ष्यो भविष्यत्येवेति ।

रतिः—नाथ ! नाथ !

मदनः—कः कोऽत्र भोः ! वसन्त ! वसन्त !

वसन्तः—(प्रविश्य) जयतु जयतु देवः । आज्ञापयतु महाराजः मीनकेतुः ।

मदनः—सेनापते ! मलयानिलप्रभृतीन् सर्वानपि सैनिकान् सज्जान् विधेहि । अप्सरसः समाज्ञापय यत् शङ्करस्य धैर्यच्युतिं कर्तुं महाराजो मदनः अभियास्यति । सिद्धा भवत इति । भृङ्गाः प्रयाणसूचकं पटहं ध्वनन्तु । कोकिलाः रणगानं कुर्वन्तु इति । अहमपि सज्जो भूत्वा प्रस्थास्य एव । सर्वं सज्जीकुरु ।

वसन्तः—सर्वं सिद्धम् । अहमपि सिद्धोऽस्मि ।

रतिः—अपि एकां मे अभ्यर्थनां पूरयिष्यति नाथः ?

मदनः—प्रिये ! तव कामनां पूरयितुं यदा कदापि बद्धकटिरेवायं जनः ।

रतिः—अपि नाम सत्यमेव एतत् ?

मदनः—त्रिवारं वदामि सत्यं सत्यं सत्यम् ।

रतिः—वसन्त ! पूर्णं शङ्करतपोवनं द्रष्टुमभिलषामि ।

मदनः—एवमस्तु । अवश्यं पूर्यते ते कामना ।

रतिः—सत्यं मे प्राणनाथः मयि प्राणैरपि प्रियं करोति ।

———

तृतीयः प्रवेशः

(पुष्पावचयव्यग्रा पार्वती सख्या सह प्रविशति)

प्रियंवदा—हला पार्वति !··· ननु पश्यसीदं लोकलोचनानन्दकरं दृश्यम् ? अहो ! नु खलु भोः कथमत्र अकस्मादेव वसन्तप्रादुर्भावः समजनीति ।

असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रकृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां संपर्कमासञ्जितनूपुरेण ।

पार्वती—सखि प्रियंवदे ! इदमपि अपरं पश्य

सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे !
निवेशयत्येष मधुर्द्विरेफान् नामाक्षराणीव मनोभवस्य ॥

प्रियंवदा—हला पार्वति ! एकं मनोगतं ते निवेदयामि यदि नाम न कोपिष्यसि । अथवा नैव भणामि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पार्वती—स्वैरं भण। विवक्षितं ह्यनुक्तं संतापं जनयति।

प्रियंवदा—यथेयं मालतीलता अथवा सर्वमपीदं वनम् अकस्मात् पुष्पितं तथा त्वमपि अद्य सविशेषं विलोभनीयाकृतिर्लक्ष्यसे।

पार्वती—किमपि मन्त्रयसि।

प्रियंवदा—से प्रियसखि! अस्मिन् शिलातले क्षणमुपविश। अहं प्रकृतिसुन्दरं ते वपुः वसन्तपुष्पाभरणैर्भूषयामि (इति हस्तेन तां शिलातले उपवेशयति मण्डयति च) आहा हा! नववधूमिव प्रियदर्शनां मे सखीं पश्यामि। पार्वति! (पार्वती अन्यत्र समर्पितलोचना तिष्ठति अनाकर्णनम् अभिनयति) (स्वगतम्) किं नु खलु चिन्तयति एषा! (हस्तेन तां विबोधयति) सखि! किं चिन्तयसि? कदा वा भर्तारं उपलप्स्ये इति।

पार्वती—किमपि आत्मगतं मन्त्रयसे। सखि! पश्य तत्र

मधुद्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
शृंगेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥

अपि च

पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालौष्ठमनोहराभ्यः।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि॥

प्रियंवदा—तरले! जानामि ते मनोगतम्। अद्य तव साह्येन मदनः कृतकृत्यो भविष्यति। अद्ययावत् कृता शङ्करसेवा ते सार्थं कुर्यात् सदा मङ्गलम्।

पार्वती—अपि नाम कैलासेश्वरः मयि सानुक्रोशो भवेत्?

प्रियंवदा—स्वयमागतं रत्नं को नाम पदा धारयेत्?

पार्वती—अस्य मे सौन्दर्यस्य तदैव साफल्यं यदा शङ्करपत्नी भवेयम्।

प्रियंवदा—सखि! अद्य ते सविशेषं सौन्दर्यं विलोक्य तर्कयामि यत् तव साह्यं विधातुं वसन्तसखः कुसुमशरः एव इतोऽभिवर्तते।

(ततः प्रविशति मदनः। मदनं विलोक्य उभे चकितचकिते)

मदनः—हिमनगजे! अहं रतिपतिः कामदेवः।

प्रियंवदा—कामदेव इति श्रोतृरसायनान्यक्षराणि। केन वा निदेशेन अनुगृहीतुम् इच्छति भवान्।

मदनः—अपि नाम मे निदेशं पालयेत् ते प्रियसखी?

प्रियंवदा—को नाम ईदृशो धीरः यः कामदेवस्य निदेशं अवधारयति?

पार्वती—यः खलु अमृतेनापि उद्विजते।

मदनः—अस्ति कश्चित् एतादृशोऽपि पुरुषविशेषः यो नाम मम वशे न वर्तते!

प्रियंवदा—तथापि मन्ये सम्भवति कश्चित् पुरुषविशेषः यत्र प्रयुक्तमस्त्रं वृथा स्यात्।

मदनः—किं भजसि-ममास्त्रं वृथा भविष्यतीति। शृणु मे प्रतापम्

तातप्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अपि च एषा च ते प्रियसखी पार्वती तमेव शङ्करं वृणोतु इति मे मनीषा। कथय कथं नाम मन्त्रयसे ?

प्रियंवदा—सखि पार्वति ! अतिथिदेवा भव। कामदेवस्य आज्ञा पालनीया इति मे मनीषा।

मदनः—स्पष्टं कथय शङ्करस्ते पतिरिष्टो न वा ?

पार्वती—भगवन् कामदेव ! त्वं सर्वस्य चित्तगतः मनोरथं ज्ञात्वाऽपि किमिति लज्जाकीलककीलितां जिह्वां पीडयसि ?

मदनः—वत्से ! परिदेवनं कुरु। यावत् तव हितं साधयितुम् अयं सन्नद्धः मदनः तावत्ते मनसि कुतो वा शङ्कालेशस्याप्यवकाशः। त्वं निश्चिन्ता ममानुरोधं कुरु।

प्रियंवदा—अहो नु खलु धन्यास्मि यदद्य कामदेवसाहचर्येन मे प्रियसखी कृतार्थतां प्राप्नोति।

मदनः—अहं समयमवेक्ष्य शङ्करस्य नियमावसानप्रसङ्गे तत्रैवाश्रमे कुसुमचापे शरमारोप्य तिष्ठामि तदा त्वं अनेनैव वेषेण आगत्य शङ्कराय पुष्पसमर्पणं कुरु। तदा त्वं तं त्वयि लुब्धं अवश्यमेव पश्यसि इति मे प्रतिज्ञा।

पार्वती—कृतार्था तर्हि भवामि। कामदेव ! अनुगृहीताऽस्मि भवता।

मदनः—शङ्करस्य ध्यानावसानसमयः संप्राप्तः। अहं लतागुल्मान्तरितः तिष्ठामि। त्वं वसन्त-पुष्पाभरणं वहन्ती शङ्करं कटाक्षविद्धं कर्तुम् प्रयतस्व।

(मदनः गुल्मान्तरितः तिष्ठति। पार्वती रत्या सख्या सह शङ्करं प्रतिगच्छति)

पार्वती—अहो ! द्वारि नन्दी तिष्ठति। तावत् तमेवोपसर्पामि। नन्दिन् ! शङ्करस्य दर्शन-मिच्छामि।

नन्दी—प्रतीक्षस्व देवि ! यावदवसरमवगच्छामि। (कक्षद्वारमुपसर्प्य शङ्करं सुस्थमवलोक्य) शंभो ! हर हर हर ! देव ! पार्वती दर्शनार्थम् अभ्येतुं विज्ञापयति।

शङ्करः—प्रवेशय।

नन्दी—यथाज्ञापयति देवाधिदेवः। (पार्वतीमुपसृत्य) इत इतोऽत्र भवती। इतो महादेवः

पार्वती—भगवन् ! प्रणमति एषा दासी। विजयोऽस्तु विजयोऽस्तु।

मदनः—(गुल्मान्तरित एव आत्मगतम्) एष एव बाणविमोचनसमयः। भो सहकारबाण ! विजयीभव।

पार्वती—एतां मालां स्वीकृत्य अनुग्राह्येयं बाला।

शङ्करः—(तस्या मुखं पश्यन् एव मालां गृह्णाति)

मदनः—हे ! नीलोत्पल ! गच्छ त्वमपि स्वकार्यं साधय।

शङ्करः—(मालां अधःपतितामपि न जानाति) कथं नाम कामरागविवर्जितमपि मे मानसम् अद्य इमां गिरिजां विलोक्य विचलितम्।

प्रतिदिनम् एव एषा समागच्छति। कुतस्तर्हि अद्यैव मे मनसि ईदृशो विकारः ? कः स्यादयं यः मे क्रोधाग्नौ शलभायते। (सर्वतो विलोक्य) आं ! मदनः। मदन ! एवं न भवसि। मयैव सृष्टः मामेव तापयसि ? लभस्व अस्य अविचारस्य फलम्।... (मदनाभिमुखं नेत्रमुन्मीलयति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(नेपथ्ये)

क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥

रतिः—(पादयोर्निपत्य) भगवन् ! त्रायस्व त्रायस्व माम् । हा दैव ! त्वया कां दशां नीतः मे प्राणसखा । केवलं भस्मनां चयमेव पश्यामि ।

समाप्तश्चेदं मदनदहनम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गुरुदक्षिणा

पण्डितश्रीयदुवंशमिश्रः

८

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गुरुदक्षिणा

कथासारः

[कविकुलगुरुः कालिदासः स्वकीयरघुवंशनाम्नो महाकाव्यस्य पञ्चमसर्गे "तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोषजातम् । उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः" [रघु० ५-१] इत्युपक्रमेण "इत्थं प्रयुज्याशिषमप्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम् । राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः" (रघु ५-३५) इति पञ्चत्रिंशत्-श्लोकेषु रघुकौत्ससंवादं व्यसजत् । तद्यथा

अयोध्याधीशस्य रघोः राज्यकाले वरतन्तुर्नाम कोऽप्याचार्यो महर्षिः कानने स्वाश्रमं निर्माय शिष्यान् अध्यापयति स्म । अथ कौत्सो नाम कोऽपि महर्षिशिष्यः अधीतविद्यः सन् गार्हस्थ्योपदेशप्राप्त्यनन्तरं गुरुं गुरुदक्षिणायै प्रार्थयामास । गुरुणा तु शिष्यभक्तिमेव पुरस्तात् परिगणय्य नातिरिक्तेन धनेन स्वप्रयोजनं प्रकटितम् । किन्तु तदर्थं भूयो भूयः सम्प्रार्थनया तेनाध्यापितचतुर्दशविद्यानुसारेण "वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति" कौत्सायादिष्टः । किं कर्तव्यतामनुसरन् कौत्सो राज्ञो रघोः सकाशं गतः । किन्तु राजा विश्वजिन्नाम्नि यज्ञे सर्वस्वं ऋत्विग्भ्यो दत्त्वा केवलं मृण्मयपात्रावशेषो बभूव, अतो न तं याचितुमुत्सहते स्म । पुनः राज्ञा पृष्टे स सर्वं वृत्तान्तं विज्ञापितवान् । रघुः परीवादभिया द्वित्राणि दिनानि यावत्तमग्न्यागारे प्रतीक्षितुं निवेदितवान् । स्वयञ्च प्रातः कैलासनाथं कुवेरं विजित्य धनमाहर्तव्यमिति निश्चित्य रात्रौ रथोपरि एव प्रसुप्तवान् ।

"अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भम् । सामन्तसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः ॥" (रघु० ५-२८) इति तदेव सूचयति । दिष्ट्या तद्रात्रावेव कोषागारे हिरण्मयी वृष्टिर्बभूव । यया स कृतकृत्यो जातः॥इति॥]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गुरुदक्षिणा

दृश्यम्-प्रथमम्

स्थानम्—महर्षेर्वरतन्तोराश्रमः (तपोवनम्)

[आसनोपविष्टः आचार्यो वरतन्तुः कौत्सश्च]

कौत्सः—भगवन्! अद्य गृहं गन्तुमभिलषामि ।

वरतन्तुः—बाढम्। तदा शृणु ।

"सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। प्रजातन्तुं मा व्यवच्छेत्सीः। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणास्तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धया देयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम्।"

अन्यच्च

"क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः
स्वयं जुह्वत एकर्षिं श्रद्धयन्तः ।
तेषामेवैषां ब्रह्मविद्यां वदेत
शिरोव्रतं विधिवद्यैस्तु चीर्णम्।"

इत्यपि स्मरणीयम्।

कौत्सः—अनुगृहीतोऽस्मि। अधीतविद्योऽधुना गुरुदक्षिणां दातुमिच्छामि ।

वरतन्तुः—वत्स! त्वद्भक्तिरूपैव दक्षिणा प्राप्ता। अलमन्येन ।

कौत्सः—भगवन्! गुरु-दक्षिणा-प्रदानं विना कथं विद्या-साफल्यं स्यात्? अतो यत्किञ्चिदपि प्रदानार्थमादेशो विधेयः ।

वरतन्तुः—भक्त्यैव मे मनः सर्वथा प्रसीदति। अलं दक्षिणया ।

कौत्सः—गुरुदक्षिणामन्तरेण कथमधीतविद्यायाः फलं प्राप्स्यामि?

वरतन्तुः—तर्हि अधीतचतुर्दशविद्यानुसारेण

"वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति।"

कौत्सः—यथाज्ञापयति देवः। (गुरुं प्रणम्य गन्तुमुत्तिष्ठति)

वरतन्तुः—शिवास्ते पन्थानः सन्तु ।

[अपटीक्षेपः]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(नेपथ्ये)

श्रूयतां श्रूयतां तत्र साकेतनिवासिभिः वृत्तमेतद् यन्महाराजो रघुः विश्वजिन्नाम सर्वस्व-दक्षिणं यज्ञं समाप्य स्वपुरं प्रति निवृत्त इति ॥

दृश्यम् द्वितीयम्

स्थानम्—महाराजस्य रघोः प्रासादः

(एकाकी राजा रघुः)

काञ्चुकीयः—(प्रविश्य) जयतु जयतु महाराजः । एष खलु महर्षिवरतन्तुशिष्यः कौत्सो द्वारि तिष्ठति ।

रघुः—तेन हि कथं विलम्बः क्रियते ।

काञ्चुकीयः—यदाज्ञापयति महाराजः (निष्क्रान्तः)

रघुः—(सहर्षम्) अहो ! अद्य महर्षेः वरतन्तोः निरवशेषं कुशलवृत्तं विज्ञास्यामि ।

(ततः प्रविशति कौत्सः)

रघुः—(उत्थाय) ऋषे ! स्वागतम् । इदमासनम् । इहास्यताम् । (कौत्सः उपविशति)

कौत्सः—स्वस्त्यस्तु ते । उपविश्यतां राजन् !

रघुः—(उपविश्य) कुशाग्रबुद्धे ! ऋषीणामग्रणीः गुरुस्ते कुशली वर्तते नु ? किं गुरोस्तव तत् त्रिविधं तपो वर्द्धते ? किमालवालनिर्माणादिभिः संवर्धिता आश्रमपादपाः वाय्वा-दिरुपप्लवैः रहिता विद्यन्ते ? शरीरस्थितिसाधनमन्नं वः पश्वादिभिर्नामृश्यते कञ्चित् ? किं तत्तीर्थजलानि शिवानि सन्ति "निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितॄणाम्" ?

कौत्सः—

सर्वत्र नो वार्तमवेहि राजन् नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥

रघुः—तवागमनेन न केवलं मे मनस्तृप्तम् अपि तु नियोगक्रिययोत्सुकं वर्तते । आख्याहि किं गुरोराज्ञया अथ वा स्वतः संभावयितुं मामिह सम्प्राप्तोऽसि ?

कौत्सः—राजन् !

"अभ्युत्सहे सम्प्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ।"

रघुः—निरवशेषं विज्ञापय । किं वस्तु त्वया गुरवे प्रदेयम्, कियच्च ?

कौत्सः—राजन् ! समाप्तविद्येन मया महर्षिः गुरुदक्षिणार्थं विज्ञापितः । किन्तु न तेन मद्भक्ति-मन्तरेण कश्चिन्निदेशः कृतः । अथ च तत्कृते भूयो भूयः सम्प्रार्थनया संजातरुषा गुरुणाऽ-हमादिष्टो यद्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

"वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ।
सोऽहं सपर्यां विधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे सम्प्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य" ॥

रघुः—अलं विषादेन ।

"गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतारः ॥"

अतः त्वदर्थं साधयितुं यतिष्ये । तावद् द्वित्राणि दिनानि मदीये अग्न्यागारे वासं विधेहि ।

कौत्सः—यदाज्ञापयति देवः ।

रघुः—कः कोऽत्र द्वारि तिष्ठति ?

काञ्चुकीयः—(उपेत्य) जयतु जयतु महाराजः ।

रघुः—(कौत्सं निर्दिश्य) अयमग्निशालां नेतव्यो भविष्यति ।

काञ्चुकीयः—यथाज्ञापयति देवः । (सकौत्सो निष्क्रान्तः)

रघुः—(आत्मगतम्) कष्टं भोः ! तत्को नु खल्वर्थस्यानयने अभ्युपायः ? (क्षणं विचिन्त्य)
अस्तु, कैलासनाथं कुवेरं विजित्य सत्यसङ्गरो भविष्यामि । (गुर्वर्थमर्थीति पठन् निष्क्रान्तः)

दृश्यम् तृतीयम्
(रथस्थितो रघुः)

भाण्डागारिकः—(प्रविश्य) जयतु जयतु महाराजः । आश्चर्यम् ! आश्चर्यम् !! गतरात्रौ कोषागारे हिरण्मयी वृष्टिरभूत् । तत्तत्र गत्वाऽवलोकयतु महाराजः ।

रघुः—मन्ये, द्यौरपि लोकव्रतपालने साधको भवति । अस्तु द्रष्टव्यमेतत् । काञ्चुकिन् ! तावत् त्वमपि अग्निशालां गत्वा कोषागारदर्शनार्थं कौत्सः प्रार्थनीयः ।

काञ्चुकीयः—यथाज्ञापयति महाराजः । (निष्क्रान्तः)

रघुः—(रथादवतीर्य निष्क्रान्तः सह भाण्डागारिकेण)

[अपटीक्षेपः]

दृश्यम् चतुर्थम्
(कोषागारम्)

रघुः—(कौत्सं प्रति) तपस्विन् ! भवत्कृते एव गतरात्रौ स्वर्णवृष्टिः सञ्जाता ।

कौत्सः—'किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ॥

रघुः—स्वीक्रियतां तावदयं कृत्स्नं स्वर्णराशिः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कौत्सः—राजन्! न मे प्रयोजनं गुरुप्रदेयादधिकेन। अतः चतुर्दशकोटिमात्रमेव ग्रहीष्यामि।

(स्वर्णराशिं स्वीकृत्याशीर्वचनेन राजानं प्रोत्साहयति)

"आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव।"

रघुः—प्रतिगृहीतं ब्राह्मणवचः।

(नेपथ्ये)

धन्यो याचकः गुरुप्रदेयाधिकनिःस्पृहोऽर्थी। धन्यो राजा रघुः योऽर्थिकामादप्यधिकं दातुमैच्छत्।

[अपटीक्षेपः]

समाप्तश्चेदं गुरुदक्षिणानाम उपरूपकम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इन्दुमती-परिणयः

पण्डितश्रीनारायणमिश्रः, दरभंगा।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इन्दुमती-परिणयः

प्रथमं दृश्यम्

इन्दुमतीमौलिश्रीरजस्य शत्रुच्छिदः शम्भोः ।
कान्तिपराक्कृतदेवा कृपया करुणां विवर्धयतु ॥१॥

(नान्द्यन्ते)

सूत्रधारः— (नेपथ्याभिमुखमवलोक्य) आर्ये ! नेपथ्यविधानम्विधाय सत्वरमित आगम्यताम् ।

नटी— (प्रविश्य) आर्यपुत्र ! इयमस्मि । कः समादेशः ?

सूत्रधारः— कल्याणि ! कामेश्वरसिंहसंस्कृतविश्वविद्यालयानुगुणनिपुणपरिपूर्णोयं परिषत् । तदद्यैतेषाम्विदुषां प्रमोदाय महाकविकालिसग्रथितवस्त्वनुप्राणितं समुपस्थाप्यतां कविनारायणप्रणीतम् अल्पकालाभिनेयम् इन्दुमतीपरिणयाख्यमुपरूपकम् ।

नटी— यथाऽऽज्ञापयत्यार्यमिश्रः । तदुपयुक्तमनुयोक्ष्ये ।

सूत्रधारः— आर्ये ! इतस्तावदवलोकय

मानापमानितदिगन्तरराजराजि-
रस्त्राद्यमोघविनिपातविनिर्जिताजिः ।
श्रेयान् रघुर्विमलहंसकुलावतंसः
सम्प्राप्त एष परिषत्सदनं नरेन्द्रः ॥ २ ॥

तदावान्तावद्गच्छावः ।

(उभौ निष्क्रामतः)

इति प्रस्थापना

(ततः प्रविशति कञ्चुकिविदूषकाभ्यामात्मना सह तृतीयो राजा सभाभवनम्)

राजा— (विदूषकाभिमुख्येन) वयस्य !

विदर्भभर्तुर्दुहितुरिन्दुमत्याः स्वयम्वरम् ।
तस्मात्तदग्र्यभोजेनायुष्मानामन्त्रितो ह्यजः ॥ ३ ॥

तदवधारय तावत्कर्त्तव्यम् ।

विदूषकः—आर्य ! उपपन्नतरं चैतत् । तदाहूयताम्मन्त्रिवर्यः सुमतिः सम्यक्प्रतिपादनाय ।

राजा— मित्र ! युक्तमुक्तम् । (पार्श्वस्थं कञ्चुकिनमवलोक्य) आयुष्मन् ! सत्वरं मन्त्रिराजः समाहूयताम् ।

कञ्चुकी—(सशिरोनमनम्) यदाज्ञापयत्यार्यमिश्रः (इति गच्छति) ।

राजा— (स्वगतम्)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जातो युवा मम सुतोऽथ पदेऽभिषिच्य
तं सम्व्रजेदिति[1] वनं कुलधर्म एषः ।
नूनं प्रसन्नविधिना समयं विभाव्य
क्रोडीकृतोऽजकरपीडनभाव एषः ॥ ४ ॥

विदूषकः—(विचिकित्सयेव) देव ! किमनुचिन्तनीयमधुनाऽपि ?

राजा— (विहस्य) प्रिय वयस्य ! नाहं चिन्तितः । एष हि मद्विचारविषयः । (पुनरपि "जातो युवा" इत्यादिश्लोकं प्रकाशं पठति)

विदूषकः--सम्प्रति शान्तचिन्तोऽहम् । वितरामि च विधात्रे धन्यवादान् ।

(ततः प्रविशति सुमतिः कञ्चुकिना सह)

सुमतिः— विजयताम्, विजयताम्, महाभागः ! अपि कुशलम् ?

? राजा— (ससम्भ्रममुत्थाय मन्त्रिराजकरं निगृह्य) सर्वं साधु विद्वन् ! पूर्वमासनमलङ्क्रियताम् ।

(सुमतिः आसनमध्यास्ते)

राजा— प्रियामात्यराज ! विदर्भराजेन भोजेन किल स्वभगिन्या इन्दुमत्याः स्वयम्वरमुपलक्ष्य अद्य कुमारो दीर्घजीवी अज आमन्त्रितः । तदत्र श्रीमतां विचारोऽपेक्षितः ।

सुमतिः— राजन् !

यद्यप्यतीवगुणपुण्यपरिष्कृताया
युक्तं विदर्भदुहितुर्ग्रहणं महेन्द्र !
ज्ञातुन्तथाऽपि निपुणं स्थितभूतभव्या-
न्यापृच्छ्यतां कुलगुरुर्भगवान् वसिष्ठः ॥ ५ ॥

राजा— (सहर्षम्) आः ! कीदृगमृतोपमं वचः ! सत्यम्, तदवश्यमेव गन्तव्यं गुरुचरणशरणम्परामर्ष्टुम् ।

(तावत्स्वयमेव प्रविशति भगवान् वसिष्ठः)

राजा— (ससम्भ्रममुत्थाय गुरुपादयोर्निपत्य) एष रघुरनुचरोऽभिवादयते श्रीमन्तम् ।

गुरुः— (शिरसि हस्तौ प्रसार्य) आयुष्मानेधि राजन् !

राजा— (दिव्यासनमादाय) देव ! इत आस्यताम् !

गुरुः— (उपविश्य) राजन् ! अपि कुलशं सपरिवारस्य ?

राजा— श्रीमति प्रसन्ने सर्वं कुशलमेव ।

तथा हि—

श्रीमत्प्रसादैकविवर्धितेऽस्मिन्
वंशेऽनसूयेऽनुदयः कथं स्यात् ।
दिने दिनेशे दिवमभ्युपेते
किं स्यात् समर्थाऽऽवरणाय रात्रिः ॥ ६ ॥

१—तं सम्व्रजेद्वनमित्येष कुलधर्म इत्यन्वयो व्युत्क्रमेणेतिशब्दस्य बोध्यः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(अथ राजा गुरुपूजोपकरणाय गच्छति)

गुरुः— (मन्त्रिमुखमवलोक्य) मन्त्रिवर्य ! विद्वन् !

अपि साध्वखिलं प्रजाकुलं रघुराजाचरणेन साम्प्रतम् ।
परिवादनवावतारणन्नितरां भूमिपतेरसाम्प्रतम् ॥ ७ ॥
क्षयहेतुरियं महीभृतां गुणवर्णाश्रमपालनेऽस्पृहा ।
महतोऽपि हिरण्यजन्मनो न कृतं शास्त्रविगर्हितं हितम् ॥ ८ ॥
तदयं सततन्त्वया सखे विनियोज्यो विधिवत्स्वकर्मसु ।
अपमन्त्रयतो हि मन्त्रिणः परिवादोऽतितराम्भयङ्करः ॥ ९ ॥

सुमतिः— भगवन् ! श्रीमदनुग्रहेणैव सर्वं सम्पद्यते । वयं तु केवलं निमित्तभूताः स्मेत्येतावतैवालम् ।

(ततः प्रविशति पूजोपकरणमादाय राजा)

सर्वे— विजयताम्, विजयताम्, महाराजः ।

(पुष्पवृष्टिः)

(अथ गुरुपादौ समभ्यर्च्य प्रसन्नमनास्तिष्ठन्)

राजा— आर्य ! भगवन् !

दृष्ट्वैव देव भवतश्चरणारविन्द-
युग्मं निरस्तविगुणं विशदप्रमोदम् ।
तात्पर्यवच्छ्रुतिसहस्रमितं यतीनाम्
अद्वैतवादमपि वेदविवादमेव ॥ १० ॥

गुरुः— (रघुराजशिरसि करौ निधाय) विनेय ! आयुष्मन् ! सर्वमङ्गलकारक !

पिनाकपाणिपाणी तावन्धकान्तकरौ सदा ।
भूयास्ताम् तत्परौ राजन् भवतो हितशासने ॥ ११ ॥

(क्षणं विमृश्य) अपि प्रष्टव्यं किञ्चित् ?

राजा— गुरुचरणाः ! अस्ति किमपि.....(क्षणं मौनमवलम्ब्य) ।

ज्ञाप्यं न किञ्चिदपि यद्यपि सर्वविद्ये
श्रीमत्यथाऽपि कथनेन न कोऽपि दोषः ।
कुलीकृताखिलमलं परमं पवित्रम्
भक्त्या न पूतयति किं स्नपनादिनेशम् ॥ १२ ॥

तदेतदर्थमाशाऽभिलषिता तत्रभवताम् ।

गुरुः— राजन् ! निःशङ्कं प्रतिपादय । राज्ञो विचिकित्सा शास्त्रगर्हिता ।

राजा— (सहर्षम्) युवराजो ह्यजः स्वभगिनीस्वयम्वरमधिकृत्य विदर्भनायकेन भोजराजेनामन्त्रितः । तत्किं प्रस्थाप्यः सः ?

गुरुः— अभीष्टतरमेतत् । चिरपरिचयनिर्मलेन विदर्भकुलेन सह सम्बन्धः सर्वथा निरनुबन्ध एव सम्पत्स्यते । तदुपस्थापयायुष्मन्तं कुमारं पुरो यावत्किमप्युपदिशामि धर्मवचनम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा— अनुगृहीता श्रीमदाज्ञा ।

(अथ राजा मन्त्रिणमवलोकयति । तदाशयं विज्ञाय)

मन्त्री— (कञ्चुकिनं विलोक्य) विश्वासभाजन ! निवेदयतां युवराजाय गुरूणामनुग्रहः ।

कञ्चुकी—(सानुनयम्) यथाऽऽज्ञापयन्ति श्रीमन्तः ।

(इति निष्क्रान्तः)

गुरुः— (राज्ञो मुखमवलोक्य) आर्य ! हंसवंशहंस !

भावेन तत्रभवताम्भवताञ्जनेषु
दानेन धान्यधनयोर्गुणभाजनेषु ।
कालं निरीक्ष्य खलु मुग्धतरान्तरेण
मन्ये बुधेन विधिनैव कृतः प्रयत्नः ॥ १३ ॥

(राजा शिरःप्रणयेनानुनयं प्रकाशयति)

(अथ प्रविशति युवराजः सभासदनम्)

अजः— (सविनयं गुरुपादयोर्निपत्य) भगवन्तः ! एष प्रणमत्यजः सानुरागम् ।

गुरुः— वत्स ! निरन्तरमेधि । तवाभिलषितस्य विधाता विदधातु पूर्णताम् । ममाभिलषितञ्चैतत्—

त्वमपि रघुकुलानां भाव्यमानापमानं
जनक इव विनीय प्राप्य दिग्वर्त्तिकीर्त्तिम् ।
उडुगणमिव लुप्त्वा शत्रुपक्षं स्वसत्त्वे
कुलगुरुरिव भूया भासमानः समानः ॥ १४ ॥

कुमार ! अद्यास्माकं सौभाग्यावसरो यत्स्वभगिनीस्वयम्वरमधिकृत्य भोजराजस्यामन्त्रणमधिगतम् । तदवश्यमेव तत्र गन्तव्यम् ।

(अजः सङ्कोचं प्रकटयति)

.....एष पुनर्धर्मस्त्वयाऽवश्यमवगन्तव्यः—

मर्यादाऽतिक्रमो न किल पराक्रमः । शास्त्रगर्हा न मानार्हा । अतर्पणन्नाधमर्षणम् । जनतिरञ्जिकया नात्मपरिष्क्रिया । शास्त्रसम्मतं गतम्विहाय यौवनं न नाम शोभनं शुभाशंसितुः । यौवनं हि नाम पराभवो विभवस्य, विभवोऽरिभवस्य, साधनमनर्थानाम्, उन्मूलनं सदर्थानाम् । तस्मान्नानुसरणीयो गर्हणीयः पन्थाः यौवनविभवपराभवमासादय । विनेय ! पश्य शास्त्राणि तावदेवं वर्णयन्ति—

कुर्यात्प्रजासु सततं ह्यनुकूलभावं
दण्डेय रिपावपि च दण्डयरिपूपयुक्तम् ।
राजा भजेत विपरीतकृदात्महानि-
मत्रापरत्र च महायमराजधानीम् ॥ १५ ॥

तस्मात्स्वधर्मोनुसर्त्तव्य एवेति मदीय आग्रहः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अजः— (सविनयम्) आर्य ! यथासम्भवं सावधानं श्रीमद्विधानमनुयोक्ष्ये । इतः परं तत्र-भवताम्भवतान्दयैव निधानमिति दृढं मम विस्रम्भः । एषा पुनर्मदीयाऽभ्यर्थना—

येनैव देव ! नियमेन पिताऽनुनीतः
तेनैव सोऽहमपि शास्त्रपथेन नेयः ।

(इति कुमारः गुरुपादयोः पतति)

गुरुः— (कुमारमुत्थाप्य)

वत्सानकृत्य पितरं विनयेन यावत्
मार्तण्डमण्डलमवाप्नुहि धन्यवादम् ॥ १६ ॥

(राजानं प्रति वीक्ष्य) राजन् ! एष भगवान् भास्करः किलास्ताचलनिलयं झटिति प्रविविक्षुरितीदानीं सायं सन्ध्यावन्दनसमयः सम्वृत्तः । तदादिश मामितो गन्तुम् ।

राजा— गुरुवर ! किं गुरवेऽपि शिष्यप्रदेयो भवत्यादेशः ?

गुरुः— (विहस्य) नीतिस्तावदीदृश्येव । नृपनिदेशमन्तरा तत्सदसः प्रस्थानमनुचितम् ।

राजा— अस्तु ! आयुष्मदजस्य विदर्भप्रस्थानसमयस्तु तावदनिरूपित एवावशिष्यते । तदुपदिश्यतां शुभमुहूर्त्तम्, येन सफलः स्यान्मनोरथोऽस्माकम् ।

गुरुः— राजन् ! साध्ववबोधितोऽस्मि । (क्षणं विचिन्त्य) प्रातरेव कुलगुरौ सुप्रसन्ने विदर्भप्रस्थानं माङ्गल्यम् । तदा हि ज्योतिश्शास्त्रे सर्वकर्मसुप्रतिष्ठोऽभिजिन्नाम्नाख्यातो मुहूर्त्तः सम्पत्स्यते । तदानीं प्रस्थितस्यायुष्मतः शुभभाग्यभाजनस्य कुमारस्य नूनं मनोरथसाफल्यं सम्पद्येतेति विश्वासः । (किञ्चित्कालमास्थाय) ।

राजन्निदानीम्भगवान्दिनेशोऽ-
प्यस्ताचलोत्तुङ्गशिखाधिरूढः ।
इतः परन्तद्रजनीमुखं स्यात्
यत्पुण्यकर्मण्यखिलेप्यमूलम् ॥ १७ ॥

तदिदानीमाश्रमं जिगमिषामि ।

राजा— (सानुनयम्) यथाऽऽज्ञं श्रीमताम् ।

(इति मौनस्तिष्ठति राजा)

अजः— (गुरुगमनमधिगत्य ससंभ्रमं तत्पादौ संस्पृश्य) ।

यद्गुण्यपुण्यपदपद्मजयद्रजांसि
घ्नन्त्येव सर्वजनदोषविपत्तमांसि ।
भूयांस्यथात्मपरिवारविपत्तिमुक्त्यै
भक्त्या मदीयनतयो विलसन्तु तेषु ॥ १८ ॥

गुरुः— (कुमारमालिङ्गन्)

ओम् उपत्वेतो दधातन शं मित्रश्चर्षणीधृतः ।
विश्वभासो निरन्तरम् ॥ १ ॥
ओम् पूषाऽनष्टपशुर्दिवः सम्भजद्वाशुषे रयिम् ।
अदितिं गामुपागमत् ॥ २ ॥

(इति आशीर्वचनमुच्चार्य गुरुर्निष्क्रान्तः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा— मन्त्रिवर ! अजस्यायुष्मतः प्रास्थानिकं मङ्गलं समाचरणीयम् येनायम्प्रभातेऽवश्यमेव विदर्भाधिपराजधानीं सम्पद्येत । अथाऽस्ति कश्चन प्रत्यवमर्शः ?

सुमतिः— महाभाग ! न नाम केनाऽपि प्रत्यवमर्शेन भाव्यम् माङ्गल्ये कर्मणि । तत्सर्वं यथासमयं सम्पादयाम्येव । सम्प्रत्येष सुकुमारः कुमारः जनकोचिताभिराशीभिः अभिवर्ध्यताम् ।

(इति मन्त्री प्रस्थानोपकरणसम्पादनाय निर्गच्छति)

राजा— (पुत्रमङ्के निधाय) आयुष्मन् ! वंशावतंस !

भागीरथी भ्रमति यस्य जटाकलापे
पीयूषवद्गतमलं गरलं गले च ।
चर्माम्बरोन्धकहरः सततं विनेय !
भव्याय ते स भगवान् विधुशेखरोऽस्तु ॥ १६ ॥

वत्स ! सन्ध्या सम्पन्ना । तदावासप्रस्थानमुचितम् ।

अजः— (सविनयम्) यथाऽऽज्ञापयन्ति श्रीमन्तः ।

(इति सर्वे निष्क्रान्ताः)

पटापक्षेपः

अथ द्वितीयं दृश्यम्

(प्रातः राजा विदूषकः कञ्चुकी च सभासदने समुपस्थिताः सन्ति)

विदूषकः—महाराज ! किमेष एव कालः कुमारयात्रायाः ?

राजा— मित्र ! एवमेतत् । तदाह्वयामि मन्त्रिराजमेतदर्थम् । (कञ्चुकिनं विलोक्य) विनेय ! निवेदय मन्त्रिणे कुमारप्रस्थानमुहूर्तम् ।

कञ्चुकी—यथाऽऽज्ञापयति महाराजः ।

(इति निष्क्रामति)

विदूषकः—राजन् ! माङ्गल्यमेतद्विचार्य बहु प्रसीदति चेतः ।

राजा— सखे ! समभिनन्दनीयो हि विधाता प्रकृतकर्मणे कथमन्यथा सम्भवोऽप्यस्य शुभावसरस्याकस्मात् ?

(अथ मन्त्री सालङ्करणङ्कुमारं रथं सैन्यं च प्रास्थानिकोचितं पुरस्कुर्वाणस्तत्र समागच्छति)

सुमतिः— आर्य ! विजयताम् । एतर्हि प्रस्थानसाधनोपेतः सुकुमारः कुमारः श्रीमतां पुरः उपस्थितः । तत्सत्वरमेष प्रस्थाप्यताम् ।

(तावदेव कुमारोऽपि पितृपादयोः प्रणमति)

राजा— (कुमारं शिरसि करौ निदधानः) आयुष्मन् ! एधि । विधात्रा विधीयताम्पूर्त्तिस्तवाभिलषितस्य येनास्माकमपि मनोरथो विरथो मा भूत् । (मन्त्रिमुख

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मवलोक्य) मन्त्रिन् ! प्रस्थानपूर्वकाले गुरुचरणप्रणयो नितरां सौभाग्यास्पदः इति मन्ये ।

मन्त्री— उचितमेतत् । तत्प्रेषयामि दूतं प्रार्थयितुं गुरुवरं सर्वश्रेष्ठं वसिष्ठम् । (कञ्चुकिन-मवलोक्य) वशम्वद ! प्रार्थ्यताङ्गुरुरेतदर्थम् ।

दूतः— (सविनयम्) यथा निदेशः श्रीमताम् । (इति गच्छति)

मन्त्री— राजन् ! सम्प्रत्यन्यानपि विप्रवरानाहूय प्रास्थानिकं स्वस्त्ययनन्तावद्विधेयम् ।

राजा— (सहर्षम्) एवमेवम् । आमन्त्र्यन्तामितरे विप्रवराः ।

मन्त्री— (कञ्चुकिनमवलोक्य) विनेय ! निवेद्या द्विजेन्द्राः प्रास्थानिकस्वस्त्ययनाय ।

कञ्चुकी— (सानुनयम्) यथाऽऽदेशः श्रीमताम् ।

(इति निष्क्रामति)

राजा— (कुमारमालिङ्ग्य) कुलभूषण !

कार्यं भयं नैव कदापि गुर्वीं
राजन्यमौर्वीमवता नृपेण ।
उर्वीपतींस्तत्सकलान्विजित्य
जीयाश्चिरं हंसकुलावतंस ॥ १ ॥

कुमारः— (सशिरोनमनम्) एष खलु जनकोचितानुग्रहः तात !

(अथ कञ्चुकिसमाहूता ब्राह्मणाः प्रविशन्ति)

ब्राह्मणाः— विजयताम् विजयताम् महाभागः । क आदेशः ?

राजा— भगवन्तः ! कुमारोऽद्य शुभमुहूर्त्तमाश्रित्येन्दुमतीस्वयम्वराय विदर्भं जिगमिषुरिति प्रास्थानिकमङ्गलेन समभिवर्धनीयो हि युवराजः ।

ब्राह्मणाः— आहताऽनुज्ञा । तदेतदर्थन्दधिदूर्वाक्षतताम्बूलपर्णपूगीफलसमन्वितम्पात्रमपेक्षितम् ।

राजा— कञ्चुकिन् ! सत्वरमेतत्समानीयताम् ।

कञ्चुकी— यथाऽऽदेशो भवताम् ।

(इति पूर्वोक्तोपकरणाय निष्क्रामति । अथ च प्रविशति भगवान् वसिष्ठः । सर्वे समुत्थायाभिनन्दन्ति)

राजा— (ससम्भ्रमं गुरुपादयोर्निपत्य) एष रघुरभिवादयते श्रीमन्तम् ।

वसिष्ठः— आयुष्मान् भव राजेन्द्र ! (इत्याशीर्वितरति) ।

(अथ राजा गुरुमासन उपवेशयति । कञ्चुकी च स्वस्त्ययनोपकरणमादाय समागच्छति । अथ च विप्राः तत्र अष्टदलाङ्कितासने कुमारमुपवेश्य तद्धस्ताञ्जलौ ताम्बूलपूगीफलादि दत्वा मङ्गलगानतत्परः इवासते)

राजा— (आसनस्थं कुमारं वीक्ष्य) द्विजेन्द्राः ! किमधिकमपेक्षितम् ?

ब्राह्मणाः— न किमपि । अधुनैव वयम्भगवन्तं वसिष्ठं पुरस्कृत्य स्वस्ति वदामः कुमारस्य ।

गुरुः— (पात्रतः दूर्वाक्षताद्यादाय ब्राह्मणेतरैः सार्धं प्रसन्नः सन्) ओम् आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम् आ राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जायताम्, दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्ध्री जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायताम् निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् योगक्षेमो नः कल्पताम् ।

ओम्मन्त्रार्थाः सिद्धयः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥

(इति कुमारशिरसि दूर्वाक्षतादि गुरुप्रमुखब्राह्मणा निदधति)

गुरुः-- (दधि समादाय कुमारललाटे तिलकं कुर्वन्) आयुष्मन् !

गव्यं प्रसन्नशरदिन्दुमरीचिगौर-
मेतत्प्रतीकमुदितम्विबुधैः शिवस्य ।
तत्त्वल्ललाटपटले निहितं मयाऽद्य
तुभ्यं प्रदास्यति सुतातुलराजलक्ष्मीम् ॥ २ ॥

अपि च

स्वातिद्वितीयवपुषेन्दुमतीम्विजित्य
ख्यातिञ्च शत्रुसदने विशदाम्विधाय ।
भूयः प्रजाः समनुभावय भावनाभि-
रित्यादिकाः प्रिय ! विनेय ! शुभाशिषो मे ॥ ३ ॥

(राज्ञो मुखमवलोक्य) राजन् ! प्रस्थानकालः सम्वृत्तः । तत् सत्वरं कुमारेण प्रस्थीयताम् ।

राजा— तथाऽस्तु (कुमारं वीक्ष्य) वत्स ! गुरुनिदेशेन रथम्प्रविश ।

कुमारः— यथाऽऽज्ञा तातपादानाम् ।

(इति रथमधिरोढुमुपक्रमते)

नेपथ्ये

गच्छ गच्छ मुदा राजन् ! सर्वमङ्गलकारक !
कृपया गिरिजेशस्यावाप्नुह्यभिमतम्फलम् ॥ ४ ॥

(सभासदस्यानां करतलध्वनिः । अथ कुमारश्च रथमधिरोहति । सूतोऽपि रथं चालयितुमुपक्रमते)

सर्वे— शिवास्ते सन्तु पन्थानः (इति भूयो भूयो मङ्गलध्वनिङ्कुर्वन्ति) ।

पटापक्षेपः

अथ तृतीयं दृश्यम्

(विदर्भनगरे स्वयम्वरसदसि आसनस्थो भोजराजः पार्श्वे तत्पुरोधाः हृषीकेशः दूतः पुरश्च मगधेशः परन्तपः अङ्गराजः सुबन्धुः अवन्तिनाथो राजवाहनः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अनूपराजः प्रतीपः पाण्ड्वराजो वीरमित्रः एवमन्येऽपि केचन राजानः स्वस्वासने समुपविष्टाः सन्ति) ।

भोजराजः—गुरुवर ! आमन्त्रितेषु नृपेषु केवलमनुपस्थितोऽजराजः सूर्यकुलकमलः । स्वयम्वरसमये कियान् विलम्बः ?

हृषीकेशः— राजन् ! समयः समागतः । तदन्वेषणाय दूतः प्रेष्यताम् ।

भोजः— एवमेवम् । प्रेषयामि दूतमन्वेष्टुम् । (दूतमुद्दिश्य) परिचारक ! पश्योत्तरकोशलेश्वरस्याजराजस्य वर्त्म ।

दूतः — (सानुनयम्) यथा निर्दिशन्ति श्रीमन्तः ।

(इति गन्तुमुपक्रमत एवेति तावदन्यो दूतः प्रविशति)

अन्यो दूतः—विजयताम् विजयताम् विदर्भनाथः । श्रीमन्तः कोशलेश्वराः पुरमध्यासते ।

भोजः— विनेय ! सत्वरमानीयतां सः ।

अन्यो दूतः—यथाऽऽज्ञा महाराजस्य (इति शीघ्रं गत्वाऽजराजं समादरेण पुरस्कुर्वाणः प्रविशति ।

भोजः— (अजं दृष्ट्वा) महाभाग ! अपि कुशलम् ?

अजः— (सहरस्मयम्) सर्वं साधु विदर्भनाथ !

भोजः— (स्वगतम्) अद्य खलु महानुदयो हि मम भागधेयस्य यदेष रघुकुलभास्करः समुपस्थितः (अजं गाढमालिङ्ग्य) महाभाग ! एष हि भाग्यस्योदयो नाम ! (क्षणं मौनमवलम्ब्य) आर्य ! अद्य सौभाग्यवत्या इन्दुमत्या मम भगिन्याः स्वयम्वरसदोऽलङ्क्रियताम् । समयः समुपागतः । सर्वेऽप्यन्यमहीभृतः स्वं स्वमासनं समलङ्कृषत यथाकालम् ।

अजः— एवमस्तु मित्र !

भोजः— (अजं पुरस्कृत्य) भोः भोः परमभागधेया राजानः ! एष सूर्यवंशावतंसो दिलीपनिर्मलवंशप्रतिष्ठः रघुहर्षवर्धनः अजो नाम सम्राट् सभामुपागतः । (इति तस्य पाणिम्प्रतिगृह्य दिव्यासनमुपगत्य) आर्य !

यद्यप्यतीव विमला भवतः प्रतिष्ठा
वंशे स्थितस्य रजनीजननीनिहन्तुः ।
राजन् ! तथाऽपि विहितम्व्यवहारहेतो-
रुच्चैरथासनमिदं रघुवंशहंस ! ॥ ४ ॥

अजः— महाभाग ! एष हि भवतोऽनुग्रहाग्रह एव यदद्याहमुच्चैःपदसम्बोधितः इति मन्ये ।

नेपथ्ये

साधु साधु दिलीपकुलालङ्करण ! धन्योऽसि । अथ वा युक्तमेव रघुवंशांशस्य तवेत्थं विचारणम् ।

हृषीकेशः— (भोजराजम्प्रति) महाराज ! एष मुहूर्त्तः स्वयम्वरस्य सर्वगुणोपेतः सम्पन्न इत्यादिशेन्दुमतीं स्वयम्वरभूमिमागन्तुम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भोजः - देव ! कालः समागतश्चेन्नाल्पेनापि क्षणेन विलम्बेन भाव्यम् । विलम्बो ह्यवलम्बो दुरापदाम् । तदिदानीमेव दूतं प्रेषयामि इन्दुमत्याह्वानाय । (दूतं विलोक्य) आयुष्मन् ! निवेद्यतामेष समाचारः सौभाग्यवत्यै भगिन्यै इन्दुमत्यै ।

दूतः— (सविनयम्) स्वीकृताऽनुज्ञा महाभागस्य ।

(इति तथा कर्त्तुं निष्क्रामति)

हृषीकेशः— (उत्थाय)

श्रृण्वन्तु सर्वे राजानः सावधानं वचो मम[1] ।
उपैतीन्दुमतीदानीं स्वयम्वरसभां शुभे ॥ ५ ॥
मुहूर्त्ते सा त्रियेतादय यं प्रियँल्लोकनायकम् ।
स एव तस्या अद्य स्याद्भर्त्ता सर्वगुणान्वितः ॥ ६ ॥

(ततः प्रविशति प्रियवयस्यया सहेन्दुमती पुष्पमाल्यं दधाना । अथ च गुरुम् भ्रातरञ्च पूर्वं प्रणम्य पुरो भोजराजस्यावातिष्ठत्) ।

भोजः— (इन्दुमतीमवलोक्य) कल्याणि ! एष कालः स्वयम्वरस्य तदधुना तव सहचरी सुनन्दा समेषामेषां भूपालानाम्परिचयं निवेदयति तुभ्यम् । त्वञ्च यथाऽभिलषितं राजानं सर्वगुणसम्पन्नम्वृणु इति गुरोरादेशः प्रतिपाल्यताम् ।

इन्दुमती— भ्रातः ! गुरोरादेशोऽवश्यं नु पालनीयः ।

भोजः— (सुनन्दाऽभिमुखम्) सुनन्दे ! एनां खल्विन्दुमतीम्पुरस्कृत्यैकैकशो राज्ञाम्परिचयो देयः, येनेयं सौभाग्यसम्पन्ना सर्वेभ्यः सम्यक्परिचिता स्यात् । परिचितस्य हि वरणम्वरम् ।

सुनन्दा— महाराज ! एवमस्तु । (इन्दुमतीवामकरन्निधाय सादरस्मितम्) आलि ! एषोऽवसरः खल्वस्माकं सौभाग्यस्य । तत्प्रत्येकम्महामहिमशालिनं राजानम्मदुक्त्यनुसारेणाधुना परिचिनु स्वाभिमताऽनुगमाय । (सहेन्दुमत्या मगधेशस्य समीपमुपसृत्य) सखि ! एष हि मगधाधिपः परन्तपो नाम नरपतिः सर्वगुणपूर्णः पुरोऽवस्थित इति किं नायकमेनम्परिचिनोषि ?

इन्दुमती— सखि ! कथन्नाम परन्तपेन पराऽइमतप्ता स्यामिति चेतो मदीयम्विचिकित्सते ? (इति मुखं व्याकरोति)

परन्तपः— सुभगे ! न मदङ्गत्वमापन्नायान्त्वयि परत्वमिति कथन्नाम त्वयि ताप उपपद्यते ?

इन्दुमती— (सोपहासम्) महीपाल ! अधुनाऽपि किमहमात्मीयत्वेन भवता गृहीता ?

(इति परन्तपः क्रुधा तान्निरीक्षते)

सुनन्दा— (मुखमुद्रया तस्या भावमवगम्य अङ्गनाथसुबन्धुसमीपं सम्प्राप्य) सखि ! एषोऽङ्गराजः सुबन्धुः सुबन्धुस्त्वया करणीयः । सर्वगुणसम्पदा चायन्दक्षिणनायक इति गीयते ।

---

१. युग्मकमिदमिति ध्येयम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इन्दुमती— सखि !

स्तुवन्ति के-चिच्छरदिन्दुवन्दितां
सुधामथान्ये रविरश्मिमुद्धतम् ।
युक्तोऽप्यसौ सर्वगुणैरुदारः[१]
क्लाम्यो न मे भिन्नरुचिर्हि लोकः ॥ ८ ॥

? अपि चाङ्गराजे पूर्वपद्मलक्षणमिति अलक्षणम्पश्यामि प्रिये !

सुनन्दा— (अग्रे गच्छन्ती) एनमवन्तिनाथम्विशालवक्षसं समस्तनरपतिपतिम्महाकालनिकेतनान्तिकावसथमुद्यानपरम्पराविहाराय किमनुमन्यसे ?

इन्दुमती— (मुखं व्याकृत्यानभिप्रायम्प्रकटयन्ती) सहचारिणि ! पादौ मम सत्वरं गन्तुमुत्काविवेति किन्न प्रत्येषि ?

सुनन्दा— (अग्रे गत्वा) सखि ! अवगच्छसि कार्त्तवीर्यवंशावतंसम्प्रतीपनामानं राजानमेनम्पुरोऽवस्थितम् ?

इन्दुमती— (विहस्य) नूनं नामैनम्प्रतीपम्वेद ।

प्रतीपः— (सरोषम्)

अद्यानवद्याङ्गि ! त्वयाऽऽहतत्वात्
तव प्रदीपो भविताऽप्यहं सः ।
प्रतीप एवेति भवेयमेनाम्
जानीहि दुष्टे ! परमाम्प्रतिज्ञाम् ॥ ९ ॥

इति (ततो निर्गच्छति)

सुनन्दा— (सामर्ष सुषेणमुद्दिश्य) किं शूरसेनाधिपतिः सुषेणोऽप्यवरणीय एव ?

इन्दुमती— (सोपहासम्) अहो परहृद्गतभावभावनाचातुरी तव !

सुषेणः— (सक्रोधमुत्थाय) मूढे !

अवजानासि मां यस्मादतस्ते लोलचक्षुषी
वृतेऽप्यन्यमहीदेवे त्यक्ष्यतो नाश्रुलोलताम् ॥ १० ॥

(इति निष्क्रान्तः)

सुनन्दा— (सदरस्मयं हेमाङ्गदमुपलक्ष्य) सखि ! कलिङ्गनायकं हेमाङ्गदमेव तावदात्मसात्कुरु ।

इन्दुमती— (सकोपम्) सहपाठिनि ! किन्त्वम्माम्पिपातयिषस्यद्य ? न स्मरसि धर्मशास्त्रम्—

अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च ।
तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति ॥ इति ॥

किं न जानासि यदक्षपादानुयायिसम्पादितं हेम्नस्तैजस्त्वम् ; यच्च साक्षादेवास्मदुपाधिविरोधि ?

१—वंशस्थेन्द्रवज्रयोः सङ्कर इत्युपजातिरेवात्र छन्दः । अत्र विचारवैशद्यन्तु मत्कृतच्छन्दोऽनुबन्धे द्रष्टव्यम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुनन्दा— (सावेगम् एवमेवम् स्मरामि । (अग्रे स्थितमजं विनिर्दिश्य) पुरोऽवस्थितमजराजमेव तर्हि वृणु, शास्त्राभ्यागमः पर्यवस्यसि चेच्चेतसि !

इन्दुमती - (प्रसन्नमुद्रया) नूनमधुना शास्त्राभ्यागमो मम चेतसि । पश्य एकदा गुरुणाप्युक्तम् पुराणवाक्यम्विवृण्वता—

निरस्तसर्वापदधोच्चयस्य
दृशा तृतीयेन पुरान्तकस्य ।
देवाऽपगाऽलङ्कृतमस्तकस्य
कल्याण्यजस्येन्दुमतीशिरःश्रीः ॥ ११ ॥

(इतीन्दुमती सस्नेहमजगले पुष्पमाल्यम्परिधापयति । दिवः पुष्पवृष्टिश्च जायते)

अजः— (सहर्षमुत्थाय) कल्याणि ! धन्यवादार्हो विधाता यदद्यावयोः सौभाग्यसम्मेलनं सम्पन्नमिति नूनमस्य सदानन्दत्वं युज्यते (इत्युभावानन्दमन्थराचभूताम्) ।

भोजः— (तौ स्नेहपूर्णावलोक्य झटिति समीपमेत्याजराजं समालिङ्गन्) प्रियविद्वन् ! अद्याहं सफलमनोरथः सम्पन्नः । किमधिकम्, वंशश्च मम समाराधितकामधेनोः सर्वकामधेनोर्दिलीपस्य पौत्रम्, यज्ञार्पितसर्वस्वलघो रघोरात्मजातम्, स्वशक्त्युपेतसर्वगुणसम्पदं श्रीमन्तमवाप्य नूनं निर्मलतरः सञ्जातः । अस्माकं संयोगकारणं जगत्कारणमकारणमीशमनीशम्वयन्धन्यवादसहस्राणि वितरामः ।

हृषीकेशः— (समीपमुपसृत्य सस्नेहं तयोः शिरसि करौ निधाय)

ओम् शिवः शिवेतराशिवः शिवः शिवाय जायताम् ।
अथा वृषा मयोभुवः पतिः पशुनथाशिषे ॥ ३ ॥

(भोजराजमुद्दिश्य) आयुष्मन् ! अधुना इतः प्रस्थानमेव वरम् ।

भोजः— एवमेवम् भगवन् ! अवश्यमेवास्माभिः प्रस्थातव्यम् । कोशलेश्वर ! किमभिमतोऽस्ति भवाननेन गुरुवचनेन ?

अजः— गुरुवचनं सर्वथाऽविचार्यैव पालनीयमिति शास्त्रनिर्णयः ।

भोजः— तदस्माभिः प्रस्थीयताम् ।

(इति सर्वेऽजमग्रतः कृत्वा जिगमिषन्ति)

हृषीकेशः—(प्रस्थानसमयमभिगत्य भरतवाक्यम्पठति)

(भरतवाक्यम्)

लीलाताण्डवतत्परङ्गिरिसुतालास्यैकदास्ये वरम्
भक्तानन्दकरन्तथाऽन्धकहरङ्काशीपुराधीश्वरम् ।
गौरीलोलकपोललालनपरङ्गीर्वाणगङ्गाधरम्
वन्दे नः प्रमुदेऽर्धचन्द्ररुचिरं सत्यं शिवं सुन्दरम् ॥ १२ ॥

(इति निष्क्रान्ताः सर्वे)

पटापक्षेपः

इति तृतीयं दृश्यम्

इति मिश्रश्रीनारायणविरचितम् इन्दुमतीपरिणयाख्यमुपरूपकं सम्पूर्णम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासगौरवम्

पण्डितजीवनाथझाशर्मा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीगणेशाय नमः

कालिदासगौरवम्

(मङ्गलगानम्)

हिमनगेश्वरबालिके ! हे जननि ! जय जय कालिके !
त्वमसि भुवनैकादिशक्तिर्दीनकरुणा-सानुरक्तिः
पदसरोरुह-विनतविधिहरिगिरिशमुख-सुर-मालिके !
अघटघटनासततदक्षे ! हुङ्कृतिक्षतसम-विपक्षे !
पापिसञ्चयदर्पनाशिनि! सृष्टिलय-सञ्चालिके !

सूत्रधारः— (प्रविश्य) कविकुलगुरुमुद्दिश्य किमपि नाटकमभिनेतुमादिष्टोऽस्मि परिषदा तत्सूचनीया अभिनेतारः ।

पारिपार्श्वकः—भाव ! कोऽयं कविकुलगुरुर्नाम ?

सूत्रधारः— किन्न स्मरसि महामहोपाध्यायपक्षधरमिश्रस्य सूक्तिम् ?

यस्याश्चोरश्रिकुरनिकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः ।
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा कथय कविताकामिनी कौतुकाय ?

पारिपार्श्वकः—साधु स्मारितोऽस्मि एवमेतत् सम्प्रतिझोपाह्व-श्रीजीवनाथशर्मनिर्मितकालिदास-गौरवं नाम नूतनमेकाङ्कमुपरूपकं नाटयितव्यम् ।

(नेपथ्ये कोलाहलः श्रूयते)

सूत्रधारः— गच्छाव गच्छाव कश्चिन्मूर्ख आगच्छति दर्शयन्निजामुद्दण्डताम् ।

(उभौ गच्छतः)

दृश्यम् प्रथमम् । स्थानम् उच्चपीठपाठशाला (मिथिला)

कालिदासः— पश्यत पश्यत अहमस्य वृक्षस्योपरि कियत्सत्वरमारोहामि (एकं विशालवृक्षमारुह्य) अथास्मादवरोहामि (अवतीर्य च) कियतीं शक्तिं धारयामि ? (पुनरुच्चैः) शृणुत शृणुत मया सह कोऽपि मल्लयुद्धं कर्तुं नद्धोऽस्ति ? (औद्धत्यं नाटयति) अवधत्त अवधत्त यः कोऽपि छात्रः प्रत्यावर्तिष्यमाणाय गुरवे इदं निवेदयिष्यति तमहं चपेटाभिस्ताडयिष्यामि (मुखमाकुञ्चति) ।

एकश्छात्रः— धिङ् मूर्ख ! किमिदं कुरुषे नरो भूत्वा वानरो भवितुमुपक्रमसे !!!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(कालिदासः चपेटां दातुमुद्युङ्क्ते अपरो रुणद्धि)
(सर्वे हसन्ति)

अपरश्छात्रः— मित्र कालिदास ! कथय कति श्लोकास्ते कण्ठस्थाः सन्ति ?

कालिदासः— (विहस्य भ्रुवा किमपि सूचयन्) अगणिताः ।

अपरश्छात्रः—तर्हि त्वं मया सह अन्त्याक्षरीं कर्तुं शक्नोषि ?

कालिदासः— त्वं मया सह कपर्दिक्रीडां कर्तुं शक्नोषि ?

वयस्थश्छात्रः—(प्रविश्य) अरे रे दुर्विनीत-कालिदास ! किमेवं करोषि ? न लज्जसे वटुभिः सार्कं शास्त्रचर्चाया विभ्यत् ? न पश्यसि इमे वटवः कीदृशः पटवः सन्ति ? न विचारयसि किमर्थमत्रागतोऽसि ? कियद्वा तव वयः ? अहो त्वं केवलं कूर्दनं धावनं ताडनं गालिप्रदानं मुखाकुञ्चनमित्यादिकुकृत्यान्येव सुकृत्यानि मन्यसे ? धिक् त्वाम् । गच्छ मठं पठ निजपाठम् ।

(कालिदासो मुखं वक्रीकृत्य अनुत्तरयन्नेव अन्यतः प्रचलति)
(वयस्थश्छात्रोऽपरां दिशं गच्छति)

एकश्छात्रः— शृणु रे कालिदास ! इमां भीमां नदीं भुजाभ्यां तरीतुं शक्ष्यसि ?

कालिदासः— आं शक्ष्यामि, आं शक्ष्यामि । दिने किं रात्रावपि शक्ष्यामि ।

छात्राः— एवं ते गर्वः ! अस्तु तावत् । अमावास्यायामेव अस्यां रात्रौ गुरौ सुप्ते सति यदि त्वमेकाकी इमां नदीमुत्तीर्य भयप्रदकाननसङ्कुलं कालीमन्दिरं गच्छेस्तर्हि तव महत्त्वं मानयिष्यामः शास्यामश्च त्वं वास्तविको निर्भयो वीर इति ।

कालिदासः (हसन्) ममाग्रे भयं किम् ? अहन्तु अनया यष्टिकया भूतं पिशाचमपि हनिष्यामि । भवतु रात्रौ तथैव करिष्यामि ।

(एकोऽल्पवयाः छात्रो धावन्नागच्छति सभयं वदति च गुरुरागच्छति शीघ्रं सर्वैश्छात्रावासो गन्तव्यः) ।

सर्वे गच्छन्ति

———

दृश्यं द्वितीयम्

(स्थानं भयङ्करवनमध्ये विद्यमानं कालीमन्दिरम्)

(जलार्द्रं कौपीनं धारयन् यष्टिकाहस्तः कालिदासः प्रविशति)

कालिदासः— (स्वगतम्) छात्राणामग्रत एवाहं भीमां नदीमुत्तरीतुं प्रचलितः कतिपयैश्छात्रैः प्रतिषिद्धोऽपि निजनिर्भीकताप्रदर्शनव्यग्रमानसो न खलु अमुष्मिन् तदीय-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मुपदेशम् । अथ नदीं तीर्त्वा घोरे वने समायातोऽस्मि । (अग्रतो वेल्लन्तं भल्लूकं दृष्ट्वा यष्ट्या भूमिं ताडयति किञ्चिद्भयं प्राप्नुवन्) अहो रात्रेर्मध्यतया प्रौढोऽन्धकारः तरुलताप्रतानावृतत्वाद् द्विगुणित इव प्रतिभाति दृष्टिशक्तिं विफलयति जनयति च दिग्भ्रान्तिम् । (परिक्रम्य) अथ किङ्करोमि ? क्व यामि ? कालीमन्दिरं तु नैव पश्यामि (विचार्य) भवतु इदमेव मार्गाभासं स्थलमनुसृत्य मन्दिरमन्विष्यामि । (अग्रतो गच्छति मन्दिरमपश्यन् चिन्तयति) सत्यमेतत् यदहं सहसा अविचारितकार्यकर्ता मूर्खोऽस्मि । छात्राणां दुष्टहृदयानां दुःप्रेरणात् प्राणान् संकटे पातितवानस्मि । (पुनः साहसं कृत्वा अग्रे यष्टिं पातयन् किञ्चिद्दूरं भ्रमति) (दृष्ट्वा सहर्षम्) अहो ! इदमेव तु काल्या मन्दिरमस्ति । (मन्दिरं प्रविश्य) साम्प्रतं वृष्टिरपि भवितुमारभमाणोऽस्ति । (विचिन्त्य) अत्रागमनप्रमाणभूतं यदि मन्दिरभित्तौ स्वनाम लिखामि तर्हितद् वृष्टिजलबिन्दुतो लिप्तमवाचनीयं स्यात् । अतः सिंहासने स्थितायाः काल्या मुखे एव किन्न कालाङ्गारेण स्वनाम लिखित्वा प्रमाणयामि ? (तथा कर्तुं चेष्टमानस्य तस्याग्रतो जगज्जननी काली प्रकटिता भवति) ।

काली— वत्स ! कालिदास ! प्रीताऽस्मि तवोपरि वरं वृणीष्व ।

कालिदासः— (सभयं) का त्वमसि ?

काली— अथ त्वं मां कां मन्यसे ?

कालिदासः— (सावधानं वीक्ष्य) पादयोः पतति ब्रूते च जगज्जननि ! रक्ष रक्ष ।

काली— निर्भयो भूत्वा यथेच्छं वरं ब्रूहि ।

कालिदासः— मातर्यदि सुप्रसन्नासि तर्हि देहि वरम् अहं सर्वशास्त्रज्ञो महाकविश्च भवेयमिति ।

काली— एवमस्तु भद्र ! गच्छ यथागतम् । अस्यां रात्रौ यानि यानि पुस्तकानि अवलोकिष्यसे तान् तान् विषयान् कण्ठस्थान् करिष्यसि ।

कालिदासः— (अतीवप्रसन्नः) अनुगृहीतोऽस्मि मात्रा ।

(काली अन्तर्दधाति कालिदासः परमां प्रीतिं वहन् प्रत्यागच्छति)

जवनिका पतति

दृश्यं तृतीयम्

(स्थानम्-सौराष्ट्रग्रामस्थपाठशालाप्राङ्गणम्)

(सर्वे छात्रा अध्यापकाश्च कालिदासं मध्ये कृत्वा गोष्ठीं कुर्वन्ति समीपस्था जनता अपि तत्रोपस्थिताः सन्ति) ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासः— कोऽपि छात्रो मया सह शास्त्रार्थं कर्तुं शक्नुयात् ?

एकश्छात्रः— ईश्वरसिद्धिविषये व्याख्यानं कर्तुं त्वया शक्यते चेत् क्रियतां प्रथमं ततः शास्त्रार्थ-चर्चा कर्तव्या।

कालिदासः— सम्यक् शक्नोमि शृण्वन्तु भवन्तः।

(सुललितसंस्कृतभाषायां शास्त्रानुकूलामीश्वरसिद्धिं प्रतिपादयति)

अध्यापकः— आश्चर्यम् ! आश्चर्यम् !! एवम्भूतं सुन्दरं व्याख्यानन्तु अस्माभिरपि न कर्तुं पार्येत किमुत छात्रैः ? अयं कालिदासः कुण्ठितकण्ठतया कण्ठस्थमपि विषयं प्रकाशयितुं ह्यः पर्यन्तं नाशकत्। स एष सम्प्रति अनवद्यगद्यपद्यधारां प्रावहयति इति आश्चर्यम् ! आश्चर्यम् !!

(सर्वे आश्चर्यमुद्रां नाटयन्ति)

एको वृद्धः— यथैव सर्वेषु छात्रेष अयं कालिदास एव दुर्बोधतम आसीत् तथैव सम्प्रति एष एव सुबोधतमोऽभूत्। मन्ये अध्यापनैककर्मणां कालीपदभक्तानां महतां भवतामेव तावदेतच्छ्रेयस्त्वम्।

अध्यापकः— नात्र सन्देहो यत् न केवलं छात्रेषु किन्तु पण्डितेष्वपि सुयोग्यतमोऽयं जात इति। किन्तु अस्मिन् स्तुत्यकृत्ये नास्मि अहं कारणम् न जाने कथमेष सद्य एतादृशीं प्रतिभामासीसदत् ? (कालिदासं लक्षीकृत्य) भो अनुपमप्रतिभानिवास ! सन्मिश्रकालिदास ! कथय कथय कथं त्वया अप्रतिहतं पाण्डित्यं कवित्वञ्च सद्यः समासादिषाताम् ? न केवलमस्माकमपि तु सर्वेषामेव समागतसज्जनानां कर्णौ सुधोपमं त्वद्वचः श्रोतुं नितरां समत्सुकौ स्तः।

कालिदासः—(करौ सम्पुटीकृत्य)

शृण्वन्तु गुरवः ! गतायां रात्रौ नदीं तीर्त्वा पारं गतस्तत्रार्द्रवसन एव कृतवनभ्रमणो मल्लूकादिजन्तूनालोक्य भयमुपगतोऽपि प्रतिज्ञापूर्तिहेतवे तदपसार्य वनमध्ये कालीमन्दिरमगमम्। तत्र धूपधानीतो निर्वाणाङ्गारेण प्रमाणाय कालीमुखे स्वनामलिखन्नेव तत्राकस्मात् प्रकटितां साक्षाज्जगज्जननीं पश्यन्नेव पादयोरहं पतितः। सा च मह्यं वरमदात्। तत्प्रसादादेव प्राप्तविद्योऽस्मि।

एकश्छात्रः— विषयोऽयं सत्यम्। प्रातरेवाहं तत्र गत्वा काल्या मुखं तथाविधं दृष्ट्वाऽऽयातोऽस्मि।

अध्यापकः—वाणीन्दिरोभयवन्दिते कुले जन्म, क्षेत्रनिखातनिधिदर्शनम्, आवालं नीरोगता, पारिवारिकं पूर्णमैकमत्यम्, अप्रतिहतप्रतिभाप्राप्तिश्चेति जगज्जनन्या आदि-शक्तेरकम्पामनुकम्पां विना नैव भवितुमर्हति। (प्रसन्नमुद्रां कृत्वा) अथ सर्वं युज्यते कालीप्रसादात्। किमस्ति वस्तु असम्भाव्यम् ? साधु कालिदास ! साधु। न केवलं त्वया परं पाण्डित्यमुपगतम् अपि तु उच्चपीठस्थानमेतत् अन्वर्थतां प्रापितम्। अथ च मिथिला गौरविता वयञ्च कृतार्थीकृताः साधु साधु।

कालिदासः— आदरणीया विद्वांसः ! भवतामेव शिष्यो न खलु भवदीयां कृतज्ञतां विस्मरिष्यामि। शुभाशीर्भाजनमहम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिकां कमलां चैव मिथिलां चरणाँश्च वः ।
उच्चैःपीठमिदं स्थानं यावज्जीवं स्मराम्यहम् ॥
(सर्वे सोल्लासा आशीर्वादं वितरन्ति)

जवनिका पतति

दृश्यं चतुर्थम् । स्थानं पाटलिपुत्रम्

(विक्रमादित्यपदभूषितद्वितीयचन्द्रगुप्तस्य राज्यसभा सज्जितास्ति)

राजा— अभिज्ञानशाकुन्तलनाटकस्याभिनयं दृष्ट्वा तत्र च लौकिकमर्यादानुगतां स्वाभाविकतां विप्रलम्भशृङ्गारस्य साशेषजनतुष्टिं पुष्टिं सहासं विविधरसविन्यासं भासित-साक्षात्कारं निर्वहणसन्धिं निर्वहणचमत्कारं च पर्यालोचयता तन्मयध्यानतया मया न पारितमानन्दवाष्पाणि रोद्धुम् ।

धन्वन्तरिः— सत्यमिदं नाटकरत्नं प्रथमं स्थानमाददाति उत्कृष्टतायाः । यतः
'काव्येषु नाटकं रम्यं नाटकेषु शकुन्तला' इति जनप्रसिद्धिः कथमन्यथा प्रसृतिं गच्छेत् ?

राजा— इदमपि नासत्यं यत् रघुवंशमहाकाव्यस्य सादृश्यं कर्तुं सम्प्रति किमप्यपरं काव्यं नास्तीति । तत्र हि चमत्कारपूर्णोऽलङ्कारसमावेशः, कोमलकान्तपदावलीविलासः, प्रतिपद्यमर्थवैशद्यम्, प्रतिसर्गं नैसर्गिको विविधध्वनिः, अपुष्टतादिदोष-राहित्यम्, रसानुगुणसकलरीतिसाहित्यम्, सर्वत्र सरसता हृदयाकर्षकता विलक्षण-चमत्कारिता च स्वतः प्रमाणयति तदीयं महत्त्वम् ।

धन्वन्तरिः— अत्र कः सन्देहः ?

राजा— छायावादप्रधानं मेघदूतमेव वा कतरस्मादवरं यत्र विप्रलम्भः साकारतामुपयाति । (स्मृत्वा) अन्या अपि सर्वाः कृतयः परमोच्चकोटिका एव सन्ति तदीयाः । अतोऽहं कामये अप्रतिमप्रतिभाशालिनस्तस्य यथोचितं सम्मानं विधातुं तस्मै महामतये महाकविपदवीप्रदानेन च दातुम् ।

धन्वन्तरिः— राजन् ! विद्याप्रणयावदातचेतसो देवस्य प्रसादादेव सर्वे महीयांसो विद्वांसः साम्प्रतममन्दमानन्दं लभमाना ग्रन्थरत्नगुम्फनं विदधति । वीरविक्रमादित्य ! धन्योऽत्रभवान् धन्यश्च महाकविः कालिदासः येन विदुषा ईदृशीमतिमहतीं प्रतिभां धारयताऽनल्पाऽऽकल्पपर्यन्तस्थायिनो कृतिः कृता देवश्च राज्यकार्य-व्यासमना अपि अनारतं हंसः क्षीरमिव काव्यगुणगणं गृह्णाति ।

राजा— महान्तः सुधियः ! देशस्य वास्तविकं गौरवं भवादृशां विदुषां रमणीया कृतिरेव वर्द्धयति न तु जातु रमणीयाऽऽकृतिः कोऽपि कृती राजा यो रात्रिन्दिवं विलासपरः सत्यं वसुन्धराभार एव ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अमरसिंहः— देव ! वयन्तु मन्यामहे मालाकारं विना पुष्पवाटिका, तरुं विना लता, हिमालयं विना गङ्गा, धरां विना धान्यं, गुरुं विना विद्येव च भवादृशं शरणं भूरमणं विना कुत्र स्थितिं विदधीत प्रशान्तस्वान्तोऽपि विलक्षणप्रेक्षो विचक्षणगणः ?

राजा— राजस्तुतिरियं भवतां विनयं कृतज्ञताञ्च विज्ञपयति । वस्तुतस्तु 'स्वदेशे पूज्यते राजा विद्वान् सर्वत्र सर्वथेति' प्राचीनोक्तिमेव साधीयसीं वयं मन्यामहे ।

धन्वन्तरिः— देव ! अद्यैव शुभमुहूर्तो वर्तते ।

राजा— एवमिदं निमन्त्रितोऽस्मि सन्मिश्रो मया ।

प्रतीहारी— (प्रविश्य) श्रीमन् ! कालिदासनामको विद्वान् श्रीमन्तं दिदृक्षुः प्रतीक्षते ।

राजा— ससम्मानं प्रवेशय ।

कालिदासः— (प्रविश्य)

शत्रौ करालवदना भक्ते कमलकोमला ।
आदिशक्तिर्महाकाली वैष्णवी ते प्रसीदतु इति

आशीर्वादं वितरति

राजा— (गाढमालिङ्गन् उच्चासने उपवेश्य)
सत्यं सत्यं प्रसीदामि सभा गौरविता मम ।
महाकवे ! भवत्पादपङ्कजस्याद्य दर्शनात् ॥

(सदस्यान् प्रति) भो भो विवेकशालिनः सदस्याः । शुभमुहूर्तेऽस्मिन् सन्मिश्रकालिदासाय मया 'महाकवि'पदवी प्रदीयते आदीयते चायं पण्डितमण्डलीमण्डनत्वेन गोष्ठ्याम् ।

सर्वे सदस्याः— (करतलध्वनिपूर्वकम् उच्चैःस्वरेण)
साधु साधु धन्यो देवः धन्यो देवः ।

धन्वन्तरिः— विविधविद्याविद्योतमानाय कविकुलगुरुकालिदासाय विद्वज्जनजीवातवे रिपुकुलकरालत्राहवे विधीयमानभारतीसेवाय देवाय च स्वस्ति स्वस्ति स्वस्ति ।

एष श्रेष्ठकविस्त्वं च विदुषामाश्रयो महान् ।
युवाभ्यां भारतं वर्षं गुरुतां लभते पृथुम् ॥

(नाटकीयरीत्या आशिषं ददाति)

जवनिका पतति

समाप्तश्चेदमुपरूपकम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शाकुन्तलम्

पण्डितश्रीरामावतारमिश्रः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शाकुन्तलम्

गुरोरङ्घ्रिप्रसादेन तीर्यते भवसागरः ।
किं न तं ध्यायमानस्य करामलकवद्भवेत् ॥१॥

(स्थानं तपोवनम् । तपस्विनीवेषेणैकस्याः प्रियसख्याः प्रियम्वदायाः प्रवेशः)

सखी — न जाने कीदृशी जाता वयस्या मे शकुन्तला ।
विषण्णा खिद्यतेऽभीक्ष्णं पौरवे दृष्टिगोचरे ॥२॥

किं कुर्याम् ? पिता कण्वोपि साम्प्रतं नास्ति । माता गौतमी तु विद्यते । परन्तु तत्समक्षं तदवस्थाप्रकटनं कदाचिदनर्थकरं स्यात् ! सा मयि परं विश्वसिति । तद्रहस्योद्घाटनं न कस्याप्यन्तिके साम्प्रतम् मम प्रियवयस्यायाः । तदन्विष्यामि क्वास्तेऽधुना सा व्यग्रहृदया मे प्रियसखी । (परिक्रामति)

शकुन्तला—(प्रविश्य)

न जाने कथं खिद्यते मानसं मे ॥
प्रभाते विहङ्गो यथा धीरताद्य ।
गता व्याकुलं विद्यते मानसं मे ॥ न जाने० ॥
पुरा यत्र नासीद्विकारस्य लेशः ।
इदानीमहो भिद्यते मानसं मे ॥ न जाने० ॥
लभे शर्म न क्वापि शान्तिर्निरस्ता ।
अकस्मादहो छिद्यते मानसं मे ॥ न जाने० ॥

प्रियम्वदा—इयमेव मे सखी शकुन्तला ! किं परिचीयते सैवेयमस्तीति । दिवसेनेयं परकीया सम्वृत्ता । अहो ! मनस्तापः । (शकुन्तलां प्रति) एतादृगात्मनि विस्मृता यत्समीपस्थामभिन्नहृदयां सहचरीं मां नावलोकयसि ?

शकुन्तला — (अश्रुत्वानवलोक्य च) अहो क्व गतोऽसौ ? कीदृशं तस्य रूपमाधुर्यम् ? कीदृग् व्यक्तित्वम् ? कीदृगवलोकनम् ? कीदृग् वचनरचनम् ? कीदृग् हृदयसारल्यम् ? मम हृदयान्नापसर्पति तत्सर्वमेव । पूर्वजन्मनि कीदृक् तपो विहितममुना यत्सर्वमेवानवद्यमनुपमं चासादितम् । परन्तु धिङ् माम् ! याहमार्यावर्तीयबालिकापि आश्रमवासिन्यपि पितृकण्वपरिपालितापि आगन्तुकं पुरुषं दृष्ट्वा एतादृशीमवस्थामनुभवामि । गर्हितं मे जीवनम्, दूषितं तपोवनम्, विस्मृतं पितृप्रियत्वम्, कलङ्कितं मे सकलं तत्परिपालनचेष्टितम् । (निःश्वस्य) परन्तु किं कुर्याम् ? हृदयान्नापसर्पति सर्वं तच्चेष्टितम् । विस्मर्तुं च न क्षमतेऽन्तःकरणं तदनवद्यं रूपम् ।

प्रियम्वदा—शकुन्तले ! शकुन्तले ! किं प्रजल्पसि ?

शकुन्तला—आः ! सखिप्रियम्वदे ! त्वं कुतः ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रियम्वदा—स्मृतिसुखं विच्छेदयितुमापतितेत्यपि वद ।

शकुन्तला—(सलज्जा) कस्य स्मृतिः ? कीदृशं सुखम् ? को नाम विच्छेदः ?

प्रियम्वदा—त्वमिदानीं स्मृतिपिशाचिकाभिभूतासीति को नावगन्तुं शक्नोति ? यथापूर्वं त्वद्रूपम् ? स्फूर्तिश्चमत्कृतिर्वा हृदयं वर्तते ?

शकुन्तला—(अधोमुखी एव) सत्यं ब्रवीषि त्वं तु मम हृदयम्, त्वत्समक्षं किं गोप्यम् ? परन्तु कथमेतादृशी ममावस्था ?

प्रियम्वदा—अत्र किं विचारणीयम् ?

हृदयं सरलं यस्य मृदुलं च विशेषतः ।
स्वल्पाघातेऽपि संजाते चूर्णीभवति पुष्पवत् ॥ ४ ॥

शकुन्तला—मदीये हृदये केनाघातः कृतः ?

प्रियम्वदा—तस्यैव दौर्बल्येन ।

शकुन्तला—तदा पाषाणं विधेयम् ।

प्रियम्वदा—अवश्यं विधेयम् ।

शकुन्तला—परन्तु यदि भवेत् ?

प्रियम्वदा—माक्षिके कृतेऽपि को लाभः ? केवलं सन्तापश्चिन्ता विषादश्चेति ।

शकुन्तला—सखि ! पाषाणेऽपि प्रतिमाङ्क्यते ।

प्रियम्वदा—अङ्क्यते, चिरस्थायिनी च भवति, परन्त्वनायासेन न ।

शकुन्तला—सत्यं ब्रवीषि, परन्तु—

स्वभावमृदुलं पुष्पम् पाषाणं चूर्णलेपनात् ।
किं शक्यते दृढं कर्तुमथवान्यप्रयत्नतः ॥ ५ ॥

प्रियम्वदा—एतद्विषये किं वक्तव्यम् ?

सहजो न गुणः पुंसां कथञ्चित्परिवर्तते ।
इन्दुर्दधाति नोष्णत्वं न च शैत्यं दिवाकरः ॥ ६ ॥

शकुन्तला—तत्किं कर्तव्यम् ? त्वमेवादिश ।

प्रियम्वदा—हृदिस्थो जनो दृक्पथमानेतव्यः । किमन्यत् ?

शकुन्तला—एकदा तु दृक्पथे समायाते एतादृशो रोगो व्याप्तः पुनरायाते न जाने किं भविष्यति ? तद्वर्जनीयैव तदीया चर्चा । परन्तु हृदयं न मन्यते । आकांक्षते तत्सौम्यमुखावलोकनसुखम् ।

प्रियम्वदा—अत्र तथा यतनीयम् यथा न दृष्टिपथादन्यतो व्रजेत् ।

शकुन्तला—कथमेतत् संभाव्यते ?

प्रियम्वदा—सम्भाव्यते, दृढं सम्भाव्यते । शृणु—

यदात्वदक्षोर्विषयं गतोऽसौ
दृष्टा प्रसन्ना मुखपङ्कजश्रीः ।
विहाय त्वत्सङ्गमथ प्रयाणे
सायं यथा सङ्कुचितेव जाता ॥ ७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अतोऽनुमीयते तस्यावस्था त्वत्समानैव भवेत्। यः स्वयं विखिन्नो भवति सोऽचिरादेव परवेदनामपि जानाति। अतोऽत्र धैर्यमवलम्बनीयम्।

शकुन्तला—परन्तु पिता·····

प्रियम्वदा—पिता तु त्वत्कृतेऽहर्निशं चिन्तयत्येव। कदा योग्यवरेण संगता भविष्यति शकुन्तलेति।
यदैवैतत्सम्बन्धं ज्ञास्यति परितुष्टो निर्विघ्नश्च भविष्यति।

शकुन्तला—एतद्विषये त्वमेव शरणं सखि! किं ब्रवीमि।

प्रियम्वदा—गच्छोटजं सुखं तिष्ठ सर्वं कार्यं भविष्यति।
गुरु-देवप्रसादेन सेत्स्यत्येव मनोरथः॥ ८॥

(उभयोः प्रस्थानम्)

समाप्तं प्रथमं दृश्यम्

———

द्वितीयं दृश्यम्

(ततः प्रविशतः अनसूयासहिता प्रियम्वदा)

प्रियम्वदा—आः, अनर्थमापतितम्। सम्पन्नमपि सर्वं कार्यं विघ्नितं जातम्।

अनसूया—सत्यम् महाननर्थो जातः। क एतज्जानाति स्म यत् पौरवो राजर्षिर्दुष्यन्तः युवावस्थायामपि तपोवनमलङ्करिष्यति। मम वयस्या शकुन्तला च तमवलोक्य तस्मिन स्नेक्ष्यति, स चान्तःपुरविभूषणासु नागरिकासु रमणीषु विद्यमानास्वपि वनौकसो विभूषणाया मम वयस्यायाः स्नेहपाशेन बद्धो गान्धर्वविधिना करग्रहणं करिष्यति।

प्रियम्वदा—एतदपि को नाम जानाति स्म, स्वेच्छया परस्परं कृतमपि आजन्मावधिकं सम्बन्धं पिता कण्वः शुभाशीःपुरःसरं स्वीकरिष्यति। किन्तु एतत्सर्वं सम्पन्नम्।

अनसूया—परन्तु

विधिर्यदाऽनुकूला स्यात्सर्वं सिद्ध्यत्ययत्नतः।
प्रातिकौल्यं गते तस्मिन् विफलः सर्व उद्यमः॥ ९॥

एतत्को जानाति स्म यत् सम्पन्नेऽपि सर्वाभीष्टे पतिवियोगशून्यहृदयाया मे सख्या महर्षिर्दुर्वासा आगत्य पतिविस्मृतिकारकं वज्रोपमं शापं दास्यति। आः! अनर्थो जातः किं भविष्यति? शापोयं परिणमतीव दृश्यते यत्तपोवनवासाय त्रिचतुर्दिनान्यवधीकृत्य कार्यवशाद्राजधानीं गते सत्यवादिनि भरतकुलभूषणे अवधिरतिक्रामति आयातो न च सन्देशवाहकः प्रेषितः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

घटितं दुर्घटं येन पुनश्च विघटीकृतम् ।
तेनैव सुघटीकृत्य भूयोपि शं विधास्यति ॥ १० ॥

तद्बीजोत्तिरप्यस्माभिर्गुरुप्रार्थनयानुनीतेन दुर्वाससा कारिता स्वदत्तचिह्नदर्शनाच्छापनिर्मुक्तिरिति ।

प्रियम्वदा—एतदपि बहुमन्तव्यम् । अग्निना जलगुणो गृहीतः । (नेपथ्ये)

या कण्वपालितसुता सरलस्वभावा
स्नेहेन वर्तयति सर्वचराचरेषु ।
सा स्वाभिभावकमतेन विहाय सर्वान्
याति स्वभर्तृसदनं करुणः समन्तात् ॥ ११ ॥

प्रियम्वदा—(श्रुत्वा) एषोपि समयः समागत एव ।

अनसूया— विवाहिता कन्या कदा यावत् पित्रालयवासार्हा भवेत् ।

प्रियम्वदा—परन्तु यदि पतिकुलपरिवारः प्रायेण पतिरेव न पृच्छति तदा तस्या जीवनं कीदृशं भवेत् ?

अनसूया— यथा भवेत्, तत्र पित्राद्यायत्तमेव किम् ?

प्रियम्वदा—एष एव चिन्ताविषयः । परन्तु चिरकालदर्शी भाग्यनिर्माता च पिता कण्वो नाविचारितं करिष्यति तद्व्रजावस्तां द्रष्टुम् । सावधानां च कुर्मः । विस्मृतौ तद्दत्ताङ्गुलीयप्रदर्शनाय ।

(उभे प्रस्थिते)

इति द्वितीयं दृश्यम्

— ० —

तृतीयं दृश्यम्

[स्थानम् कश्यपस्य तपोभूमिपार्श्वम् । एकाप्सरा आगत्य]

अप्सराः— अहो संसारः ! दुःखमूलः संसारः । मृगमरीचिका संसारः । न केवलमस्मद्दुःखेन परिवारदुःखेनापि, विशेषतः सन्ततिदुःखेन दुःखितो भवति । मम प्रियवयस्यायाः मेनकायाः किं दुःखम् ? स्वर्गे वासः, नन्दने विहरणम्, किन्तु केवलं शकुन्तलादुःखेन दुःख्यति । अस्तु । पालितो मया प्रियसख्यादेशः, सम्पादितं च सकलं तत्कार्यम् । न्यायप्रियेणापि स्वपतिना दुष्यन्तेन विस्मृतिवशात्परित्यक्ता विकम्पिताङ्गी बाष्पनिर्झरक्लिन्नवक्षोवसना शकुन्तला क्रोडमारोप्य नीता मया देवराजपित्राश्रमम् । तत्र सान्त्विता सबहुमानं रक्षिता च । परन्तु मत्प्रियसखी तद्दशां दर्शं दर्शं नितरां क्लिश्यति देवराजेन बहुसम्मानितापि न शान्तिं लभते । तत्क्लेशनिराक-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रणाय देवराजेन दृढं प्रतिज्ञातम्, यत्यते च। कृतोप्युपक्रमः। सम्प्रति प्रस्थितास्मि शकुन्तलाधिष्ठितं स्थानम्। अहो! दृश्यते पुरः शकुन्तलाधिष्ठानम्। जाने सैवागच्छतीव दृश्यते। किं परिचीयते सैवेयमिति? ततोहं लतान्तरिता तद्रहस्यं वेद्मि।

(तथा करोति)

शकुन्तला—(आगत्य सवितर्कम्) कथं मामसौ विस्मृतवान्? किं नागरिको जन एतादृश एव भवति? कामपि सरलां वाग्जालेन संयम्य विविधाभिश्चेष्टाभिः प्रलोभ्य बाह्यस्नेहेन सन्निह्य स्वायत्तीकरोति। क्षणादेव च ग्रासे मक्षिकावन्निरस्यति?

अप्सराः— नहि नहि सर्व एव नागरिकास्तथा न भवन्ति। (आत्मगतम्)

शकुन्तला— परन्त्वस्मिन् विषये ममानुभूतिरेव कियती? वने प्रसूता, आश्रमे सम्वर्द्धिता, तपस्विकन्याभिः क्रीडिता, हरिणीभिः सहोषिता। वृक्षा मे भ्रातरः खगा मे क्रीडनकाः लता मे सखयस्तत्किं जाने नागरिकाः कीदृशो भवन्तीति।

अप्सराः— सत्यं कथयति शकुन्तला।

शकुन्तला— परन्तु हृदयं तु सर्वेषां प्राणिनां भवति, सुखाद्यनुभूतिश्च सर्वेषां भवति, मानापमानाभासोपि सर्वेषां जायते।

अप्सराः— अवश्यं जायते।

शकुन्तला— स्मरामि एकदा केचिदभ्यागताः समागता आसन्। तत्सेवाकार्यप्रसक्तां मां कश्चिन्मृगपोतः निरन्तरं बाधते स्म। कार्यगौरवोद्विग्नया मयोक्तम्-अपेहि रे दुष्ट! किं ममानुपदं प्रयासि? दिनं रजनीमपि नायातः।

अप्सराः— (शिरः कम्पयित्वा) संभवति।

शकुन्तला— द्वितीयदिने तत्पदचिह्नमनुसरन्ती तदन्वेषणार्थं प्रचलिता।

अप्सराः— स्नेहस्तथा कारयति।

शकुन्तला— दृष्टवती च स मृगपोतः वृक्षतलेऽश्रुपूर्णनयनः उपविशति न खादति न पिबति न च कुत्रापि प्रयाति। मां दृष्ट्वा मुखं व्यावर्तितं तेन। तदाहं महता प्रयत्नेन संलाल्य तं स्वाश्रमाभ्यासमानीतवती। यद्यारण्यकः पशुपोत एतादृगनुभवशीलो भवति तदा मनुष्याः तेष्वपि विज्ञा नागरिकाः विशेषेण राजानः येषां करे लोकहितम्, न येषां समक्षं स्वः परो वा केवलं न्यायः न्यायः न्यायः, तेषां हृदयं कथं कृतघ्नं भवेत्। अहो दुर्दैवम्!!!

अप्सराः— अत्र महत् कारणान्तरमापतितम्।

शकुन्तला—नहि नहि, किम् दुर्दैवम्?

पुरुषजातिः निष्करुणा स्वार्थपरायणा च भवति कथमपि तत्र विश्वासो नोचितः।

यद्यद्भूतं मया सार्धं मालिनीतीरसन्निधौ।
तत्सर्वं स्वल्पकालेन विस्मृतं चाटुभाषिणा॥ १२॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वञ्चना कृता तेन प्रवञ्चकेन । नहि नहि यदि वञ्चना करणीया भवेत्तदाऽङ्गुलीयकं कथं दत्तम् ? परन्तु नहि एवम् । वञ्चक एव सः । वञ्चकस्य सर्वमेव वञ्चकमेव भवति । अङ्गुलीयेनैव किं स्वल्पा वञ्चना कृता ? ममाङ्गुलीं विहाय न जाने क्व प्रच्छन्नम् ? यदि तत्, साक्षिकं भवेत्, तत्कथमेतादृशी दशा स्यात् । तेन तु कथितम् किञ्चिद्दृढं प्रमाणं देहि यत्परिणीतपूर्वा मया । अहो दुर्दैवम् !

प्रयान्तीमाश्रमात्पत्युर्गृहं दृष्ट्वा वनौकसः ।
के न मां विकला जाता लता वृक्षा मृगाः खगाः ॥ १३ ॥
स्नेहं स्मरन्ति वृक्षाश्चेज्जडास्तन्मानवा न किम् ।
स्मरेयुः कृतसौहार्दं नान्तरायो भवेद् यदि ॥ १४॥

अन्तरायः कीदृशः एतन्मम स्वेच्छाचारितायाः फलम् । पुरा किं मूर्खा आसन् यत्समाजे नियमं कृतवन्तः यत् कन्या अभिभावकाधीना भवेयुः । तासां विवाहादिविषयेऽभिभावकाश्चिन्तयेयुः । तस्याः कृते ते यत्करिष्यन्ति तदेव हितकरं भविष्यति । एतत्परम्परां विहाय या स्वैरमाचरिष्यति सा समाजात् बहिष्कृता भविष्यति । इयं परम्परा मयोल्लङ्घिता । तस्यैव फलमनुभूयते । संसारे बहवो वञ्चका बहुविधं प्रलोभ्य बालिका अनुकूलयन्ति । ता अपि सरलतया तेषां क्रकचोपमं हृदयमविदित्वा तेषु विश्वसन्ति । स्वाभिभावकमतमवमत्य मत्वा रसालं कण्टकद्रुमं समाश्रयन्ते । पश्चादशरणं क्लेशं चानुभवन्ति । परन्तु स तादृशो नासीत् । अहो दुर्दैवम् ! अथवा यथा कृतं तथा भोक्तव्यमस्ति ।

सखी — (आगत्य) शकुन्तले ! शकुन्तले ! प्रियं ते निवेदयामि ।

शकुन्तला — किं कथयसि सखि ? प्रियं श्रोतुं मे कर्णावेव न निर्मितौ ।

सखी — जीवने सर्वम् प्रियमप्रियं च श्रवणीयं दर्शनीयञ्च भवति । तत्सत्यं कथयामि ।

शकुन्तला — किं बालो मे किञ्चिदद्भुतं कौतुकं कृतवान् ?

सखी — तत्तु साधारणम् ।

शकुन्तला — तदतिरिक्तं किं मम जीवने ?

सखी — तदेव तु कथनीयम् ।

शकुन्तला — किं महर्षेः कश्यपस्य कोऽप्यादेशः ?

सखी — सोऽपि प्राचीन एव ।

शकुन्तला — किं देवराजस्य कश्चित्संदेशः ।

सखी — महर्षेर्देवराजस्य वा कृपां विना तु न किञ्चित् प्रियं श्रूयते । परन्तु तदतिरिक्तोयं विषयः ।

शकुन्तला — कथय त्वयाद्य किं प्राप्तम् यदेतादृशी प्रसन्ना दृश्यसे । प्रत्यङ्गं तव विहसितं प्रतिभाति ।

दिवा कञ्जं यथा वक्त्रं वचनं स्मितपूर्वकम् ।
भृङ्गौ यथा चले नेत्रे प्रत्यङ्गं तरलं तव ॥ १५ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सखी— मया तदेव सम्प्राप्तं यदर्थमिह योजिता ।
सफलं वाञ्छितं मेदथ प्रियं ते विनिवेदये ॥ १६ ॥

शकुन्तला— मत्ते ! कथय किं कृत्वा समागता ?

सखी— सर्वदमनस्य यद्रक्षासूत्रमस्ति

शकुन्तला— अस्ति, तत्किं भूतम् ?

सखी— भूमौ पतितम् ।

शकुन्तला— पतितम्, तत्पुनः सन्धेहि ।

सखी— तत्त्वेकेनागन्तुकेनोत्थापितम् ।

शकुन्तला— किम् उत्थापितम् ?

सखी— आम्, उत्थापितम् ।

शकुन्तला— तत्तथैव स्थितम् ? न सर्पो भूत्वागन्तुकं दष्टवान् ?

सखी— नहि, नहि ।

शकुन्तला— तत्तु महदाश्चर्यम् । महर्षेर्वचस्तु नान्यथा भवितुमर्हति । परन्तु नहि । त्वं स्वप्ने दृष्टवत्यसि ।

सखी— किं स्वप्नः ? प्रत्यक्षं सखि प्रत्यक्षम् । त्वमप्यविलम्बं प्रत्यक्षीकरिष्यसि ।

[एकः वटुः आगत्य]

वटुः— आदिशति भगवान् कश्यपः—ममाश्रमे राजर्षिर्दुष्यन्तोऽभ्यागतस्त्वेनागतः । तच्छुश्रूषायै ससुता शकुन्तला गच्छतु ।

(वटुः प्रस्थितः)

सखी— सखि ! शीघ्रं महर्षिवचनं समर्थनीयम् ।

(किञ्चित्सलज्ज-प्रसन्नमुद्रया सख्या सह शकुन्तला प्रस्थिता)

तृतीयं दृश्यं समाप्तम्

समाप्तमिदम् शाकुन्तलं नाम एकाङ्कि-रूपकम् ।

—०—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदास-पाणिकरणम्

पण्डितश्रीसभानाथपाठकः "नाथ"

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदास-पाणिकरणम्

ईश-प्रार्थना

दयामय ! देहीदं वरदानम् ॥
नाशयेम नास्तिकतां शीघ्रं स्वेषां वयमभिमानम् ।
चरणवन्दनां तव करवाम प्राप्नुयाम सुस्थानम् ॥ दया० ॥
कृषकाणां सकला अपि विद्याः कृषिशास्त्रीयं ज्ञानम् ।
सदा वर्द्धतां स्नेहश्चित्ते भूयाद्बलितोत्थानम् ॥ दया० ॥
देशद्रोही स्यान्न तु कश्चिद्बुद्धेः स्यादुत्थानम् ।
महिलानामिह देशे नित्यं भवतु परं सम्मानम् ॥ दया० ॥
गोधर्मयोः सुरक्षाहेतोः समे सहन्तां हानम् ।
अत्रत्याश्छात्राश्च प्रकुर्युर्गुरुवर्गाणां मानम् ॥ दया० ॥
स्वस्मिन् धर्मे देशे भोज्ये भवतु सदा श्रद्धानम् ।
'नाथः' कथयत्यार्ष-संस्कृतेः सततं स्यादुत्थानम् ॥ दया० ॥

नान्द्यन्ते

सूत्रधारः— अलमधिकेन, आज्ञापितोऽस्मि परिषदा यथा अद्य एतादृक् अभिनयः अभिनेतव्यः यः संस्कृतसाहित्यज्ञानिनां परिषदि प्रयुञ्जानस्य ममापि चेतसि महान् परितोषो भवेत् । तन्नटमाहूय तत्सम्पादनाय यत्नः क्रियते । यतः

यस्तु स्वकीयां वितनोति कीर्त्तिं देशे विदेशे सकले न लोके ।
निरर्थकं तस्य च जन्म भूतले वसुन्धरे ! तं वहसि कथं त्वम् ॥

(प्रविश्य) नटः—भाव ! कः एतादृक् महापुरुषः यस्य चरितम् अभिनेतव्यम् ?

सूत्रधारः— भारतेऽस्मिन् सारस्वतभाण्डारसंग्रहीतमंजुलकवित्वपूर्णप्रबन्धपुञ्जरचनापटुः विदितवैभवः यूरूपादिदेशविस्तीर्णयशाः विदितगुणगणः कवीनामग्रेसरः कालिदासनामा महाकविः । तस्य परिणयवार्तातिरमणीया ।

नटः— अवश्यम् ! अवश्यम् !! तर्हि एतस्य महापुरुषस्य महाकविकालिदासस्य "कालिदास-पाणिकरणम्" नाम एकाङ्कीरूपात्मकः अभिनयः अभिनेतव्यः ।

[राजप्रासादे राजकुमार्य्या विद्योत्तमया शास्त्रार्थे पराजिताः विद्वांसः ईर्ष्यया "अस्याः उद्वाहः महामूर्खेण सह भवेत्" इति संचिन्त्य गच्छन्तः ते अपश्यन् यत् कस्यचिद्वृक्षोपरि स्थितः एकः युवा स्वाधारभूतां वृक्षशाखां छिन्दन्नस्ति तं दृष्ट्वा]

एकः विद्वान्— वत्स ! वृक्षात् अवतर ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

युवा— कथं अवतार्य्यते भवता ? छिन्दामि इन्धनम् अहम् ।

द्वितीयः विद्वान्—अति आवश्यकवार्त्ताऽस्ति ।

युवा— का ? का ? कथय ।

तृतीयः विद्वान्—अधः आगच्छ, कथयामः ।

युवा— (अवतीर्य्य) वदन्तु श्रीमन्तः । किम् प्रयोजनम् ?

वयोवृद्धः विद्वान्—वत्स ! वर्त्तते एका कुमारी विद्योत्तमानाम्नी । तया सह तव विवाहो भविष्यति । चल अस्माभिः सह ।

युवा— नहि ! नहि !! निर्धनोऽहम् । मया सह राजकुमार्याः पाणिग्रहणं कथं भवितुमर्हति ? कथञ्चित् परिणये जातेऽपि सा निर्धनेन मया सह कथं स्थास्यति ।

प्रथमः विद्वान्— कथं भविष्यति कया रीत्या सा स्थास्यति स्थास्यति न वा स्थास्यति; एतां चिन्तां परिहर । शीघ्रं कुरु । कार्यं वयं करिष्यामः । किन्तु..... ।

युवा— किन्तु, किन्तु किम् ?

प्रथमः विद्वान्— यथा वयं कथयामः तथा कुरु ।

पटीक्षेपः

[प्रथमं दृश्यं समाप्तम्]

[राजप्रासादे मूर्ख-विद्योत्तमयोर्विवादः विदुषां मध्यस्थता च]

एकः विद्वान्— राजकुमारि ! अयं महापुरुषः मौनरीत्या एव शास्त्रार्थं करिष्यति । प्रश्नं कुरु ।

[प्रश्नरूपेण राजकुमारी एकाम् अङ्गुलिं प्रादर्शयत् । उत्तररूपेण च मूर्खः (युवा) उभे अङ्गुल्यौ प्रादर्शयत्]

मध्यस्थः— राजकुमारि ! अनया मुद्रया तव कोऽभिप्रायः ?

राजकुमारी— एकः ईश्वरः ।

मध्यस्थः— राजकुमारि ! एतेन महानुभावेन प्रकटीकृतम् यत् द्वौ ईश्वरौ । एकः परमात्मा, अपरः जीवात्मा ।

(करतलध्वनिः)

पटीक्षेपः

[द्वितीयं दृश्यं समाप्तम्]

[राज-प्रासादान्तःपुरे स्थितयोः तयोः युवाविद्योत्तमयोः गच्छतः उष्ट्रस्य ध्वनिः कर्णपथम् आगच्छत् । तं श्रुत्वा]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजकुमारी— कस्यायं ध्वनिः ?

युवा— उष्ट्रस्य ।

[श्रुत्वा च तस्योत्तरं राजकुमारी "पण्डिताः मां वञ्चितवन्तः" इति मनसि निश्चित्य तं गृहात् बहिश्चकार अत्यन्तशोकमग्ना च बभूव । मूर्खश्च रात्रौ नातिदूरस्थं एकं देविमन्दिरं गत्वा रोदनम् आरब्धवान् । उषःकालपर्यन्तं रुदन्तं तं वीक्ष्य भगवती जगज्जननी करुणया प्रत्यक्षीभूय]

देवी— भोः ! किमिच्छसि ? प्रसन्नास्मि त्वयि वरं ब्रूहि ।

[देवभाषाज्ञानशून्यः युवा ज्ञातवान् यत् "केन ताडितः" इति देवी पृच्छति । अतः]

युवा— विदया ।

देवी— [विद्या याचते इति मत्वा] तथास्तु । महान् विद्वान् भव ।

पटीक्षेपः

[तृतीयं दृश्यं समाप्तम्]

[देवीं संस्मृत्य संस्मृत्य वरदानानन्तरं स युवा (कालिदास इति नाम्ना पश्चात्प्रसिद्धः) देवीप्रसादेन पूर्णविद्वत्तां प्राप्य परावृत्य च विद्योत्तमाद्वारि]

कालिदासः— अनावृतं कपाटं देहि ।

राजकुमारी— [परिचितो रव इव भाति इति मत्वा । कपाटं उद्घाटयन्ती] अस्ति कश्चित् वाग्विशेषः ।

[उद्घटितयोः कपाटयोः परस्परम् आलिङ्गनपूर्वकम् उभौ गृहान्तरं प्रविष्टौ]

पटीक्षेपः

समाप्तञ्चेदम् उपरूपकम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सीतात्यागः

श्रीमद्-अच्युत-तात्याराव-बोबड़े-भाजलगांवकर

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सीतात्यागः

महाकविमुखाम्भोजमणिपञ्जरसारिकाम् ।
वैदग्ध्यजलधिज्योत्स्नां वन्दे देवीं सरस्वतीम् ॥ १ ॥
पारयन्ति पण्डिता न ते गुणान् प्रशंसितुम् ।
मन्दधीरहं कथं नु पारयामि वेदितुम् ॥ २ ॥
प्रार्थये मतिं निरस्य कलुषितां हि चञ्चलाम् ।
भगवती प्रयच्छ मे सुनिर्मलां सुनिश्चलाम् ॥ ३ ॥

(नान्द्यन्ते)

सूत्रधारः— अलम् अलमतिविस्तरेण । अद्य खलु वाल्मीकिकालिदासभवभूत्यादीनां परम्परामनुसृत्य सीतात्यागसन्दर्भमिदम् उपरूपकम् अपूर्वं प्रयोक्ष्यते ।

(ततः प्रविशति धात्र्या सह चेटी)

चेटी— हले ! किं मनसि चिन्तयसि ?

धात्री— कथं सीतायाः भवेदित्यहं चिन्तयामि । नानाजनेभ्यः किंवदन्ती तस्याः विषये मया श्रुतम् ।

चेटी— अयि ! जनाः किं वदन्ति ?

धात्री— हां हां, सीतास्वीकारविषये पौरजानपदाः रामम् अपवादयन्ति । रावणगृहे स्थिताया अपि सीतायाः स्वीकारः रामेण कृतः इति ।

चेटी— कथय तस्याः वृत्तान्तम् । अस्ति मे कुतूहलं सर्वं तद् विषयं वृत्तान्तं श्रोतुम् ।

धात्री— पौरजानपदेषु लोकापवादमुपश्रुत्य प्रजानुरञ्जने दक्षः कर्तव्यकठोरः रामः कठोरगर्भाम् अपि जानकीं सहसा तत्याज ।

चेटी — रामस्य प्रतिकारः न केनाऽपि कृतः ।

धात्री— तदा गुरुजनः समीपे नासीत् ।

चेटी— गृहात् निरस्ता अपि विशुद्धा सीता न किमपि अवदत् ।

धात्री— सीता वह्नौ विशुद्धा अपि जनैः अपवादिता । अतः सा वक्तुम् असमर्था ।

चेटी— तदा रामेण सीताविषये किमपि न चिन्तितम् ?

धात्री— यदा स्त्री स्मितैः सेवाभिः प्रियस्पर्शैः च पुरुषहृदयानि आकर्षति तदा एव पुरुषः नारीसुखम् अनुभवति । परं यदा स्वस्त्रीं जनाः निन्दन्ति तदा पुरुषः प्रियपत्नीमपि परित्यज्यति ।

चेटी— अयि सखे ! रामसमीपे कलङ्कं परिमार्ष्टुं नान्य उपायः ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

धात्री — विभिन्नं काचपात्रं न पुनः सन्धातुं शक्यम्। अत एव सीतायाः चरितं केवलं वनवासनिबद्धं तिष्ठति। स्वपत्नीविषयकलोकापवादं श्रुत्वा प्रजानुरञ्जने दक्षः रामः कथं सन्तुष्येत्।

चेटी — शैशवात् प्रभृति पोषितां प्रियां जानकीमपि रामः मृत्यवे ददाति। अहं तु मन्ये रामः निष्ठुरः दुष्टः हीनः लोकापवादात् यः स्वप्रियां पत्नीं त्यजति। स तु राक्षस एव।

धात्री — सखि! अलमलम्। एवं मा वक्तव्यम्। (रोदिति)

चेटी — प्रिये! किमर्थम् इमानि अश्रूणि। किमर्थं वा स्वमुखं करकमलाभ्यां संवृणोषि? सखि! मया त्वं पीडिताऽसि। विस्मर यन्मया उक्तम्।

धात्री — सखि! न तत्र तव दोषः। मम अश्रूणि दृष्ट्वा त्वं मनसापि न किमपि चिन्तयेः। सीता-त्यागकारणे मम अश्रूणि न तु तव प्रश्नविषये। (निष्क्रान्तः)

द्वितीयः प्रवेशः

(ततः प्रविशतः गर्भभरालसा सीता लक्ष्मणश्च)

लक्ष्मणः — (स्वगतम्) हा कष्टं ज्येष्ठस्य भ्रातुर्नियोगपरवशेन अतिनृशंसमारब्धम्। हा धिक्! हा धिक्!!

अग्निशुद्धां वैदेहीं देवीमपि अधुना जनः अपि सापवादयति। हन्त! नाहं रामस्य वचनं निषेद्धुम् अनुमोदितुं वा समर्थः। रामः स्वयमेव वदति।

'अन्तरात्मा च मे वेत्ति सीतां शुद्धां यशस्विनीम्'। तामेव च त्यजति रामः।

सीता — वत्स लक्ष्मण! सुरुचिरोऽयं वनप्रदेशः। प्रियङ्करो मे आर्यपुत्रो येन दोहदो मे सम्पादितः।

लक्ष्मणः — (स्वगतम्) अहह!!! असिपत्रवृत्तां भर्तारमद्यापि कल्पद्रुमं मन्यते।

सीता — वत्स लक्ष्मण! किमिदं वामाक्षिस्पन्दनम्? नमो रघुकुलदेवताभ्यः। सानुजस्य मे भर्तुः शिवं भूयात्।

लक्ष्मणः — (स्वगतम्) मुग्धा जानकी अस्माकमपि कल्याणम् इच्छति। कीदृशोयम् प्रसङ्गः! आर्ये! भागीरथीतीरमुपस्थिता वयम्।

सीता — एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।

लक्ष्मणः — आर्ये! वन्दस्व भगवतीं भागीरथीम्।

सीता — (प्रणम्य) वत्स लक्ष्मण! कस्येदमाश्रमपदम्?

लक्ष्मणः — भगवतो वाल्मीकेः। (सगद्गदम्) आर्ये! रक्षसो गृहे स्थितत्वात् त्वयि प्राप्तचरित्र-सन्देहः लोकः। इमं कलङ्कं तव त्यागेन राजा परिमार्ष्टुम् इच्छति। अतः आर्ये! पराधीनस्य मे रुक्षतां क्षमस्व।

सीता — हा! हतास्मि। (मूर्च्छति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्मणः— आर्ये ! समाश्वसिहि समाश्वसिहि । मया भ्रातुराज्ञया यद्दारुणं कर्म कृतं तत्क्षमस्व । (पादयोः पतति)

सीता— (संज्ञां लब्ध्वा) सौमित्रे ! त्वं भ्रात्रा परतन्त्रोऽसि । न मे त्वयि रोषः । किन्तु देवसमक्षं वन्हौ विशुद्धामपि मां लोकापवादश्रवणात् नृपतिः त्यक्तवान् तत् किं सदृशं कुलस्य ? अस्तु

वत्स लक्ष्मण ! पार्थिवं मम कुशलं ब्रूहि ।
तथापवादं पौराणां नानुशोचामि दुःसहम् ।
पतिर्हि देवता नार्याः पतिर्बन्धुः पतिर्गुरुः ॥

मयि वर्तमानं सूनोः प्रजानिषेकमनुध्यायत इति श्वश्रूजनं विज्ञापय ।

लक्ष्मणः प्रणम्य निष्क्रान्तः

तृतीयः प्रवेशः

सीता—(मुक्तकण्ठं रोदिति) हा आर्यपुत्र ! हा लक्ष्मण !! हा अम्ब !!!

(ततः प्रविशति वाल्मीकिः)

वाल्मीकिः—(रोदनं श्रुत्वा) अये ! केयं वने योषिता उच्चैः लक्ष्मण लक्ष्मणेति दीनाक्षरं रोदिति ? (समीपम् आगत्य) आं ज्ञातम् ! एषा जनकात्मजा । वत्से ! मिथ्यापवादात् त्वं त्यक्ता इति अहं जानामि । मा व्यतिष्ठाः । ते पिता जनकः श्वशुरः कौसल्यापतिः दशरथः मे सखायौ । वत्से ! इदं मम आश्रमपदं पितुरेव गृहम् । मे पर्णकुटिकायां वस त्वम् । अत्रैव तव अपत्यस्य संस्कारो भविष्यति ।

सीता—(प्रणम्य) ऋषे ! अनुगृहीतास्मि । मदन्तर्गतं रघुकुलस्य तेजो रक्षणीयम् ।

वाल्मीकिः—वत्से ! किं ते भूयः प्रियं करोमि ।

सीता— मे अपरं किं प्रियमस्ति ? जननान्तरेऽपि स एव मे भर्ता भवतु इति ।

वाल्मीकिः—तथास्तु ।

? यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा भुवनेऽत्र विराजताम् ॥

समाप्तञ्चेदमुपरूपकम्

३

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha